ग्रंथ सं० १८२१८     विषयः पुराणेतिहासम्     ग्र सं०

नाम भागवतम् (दशमस्कन्धः)     ग्रन्थकार

पत्र सं० १-४२ (१५ अध्यायपर्यन्तम्)

ग्रन्थ सं०     अक्षर सं० (पंक्तौ) ३६     पंक्ति सं० (पृष्ठे) १०

आकार ११.५" × ५.७"     लिपि: दे. ना.     आधार: प.

सं० विवरण पू०     14476

पी० एस० यू० पी०—९९ एच० सी० ई०—१९५१—५०,०००

नं. ३२३३

[illegible]

Indira Gandhi National
Centre for the Arts

[illegible] पूर्वा·

कथितोवंशविस्तारोभवतासोमसूर्ययोः राज्ञांचोभयवंश्यानांचरि
तंपरमाद्भुतं १ यदोश्चधर्मशीलस्यनितरांमुनिसत्तमः तत्रांशेनावतीर्णस्यवि
ष्णोर्वीर्याणिशंसनः २ अवतीर्ययदोर्वंशेभगवान्भूतभावनः कृतवान्यानिविश्वा
त्मातानिनोवदविस्तरात् ३ निवृत्ततर्षैरुपगीयमानात्भवौषधाछ्रोत्रमनोभिरामात्
कउत्तमश्लोकगुणानुवादात्पुमान्विरज्येतविनापशुघ्नात् ४ पितामहामेसमरे
मरंजयैर्देवव्रताद्यातिरथैस्तिमिंगिलैः दुरत्ययंकौरवसैन्यसागरंकृत्वातरन्वत्सप
दंस्मयत्प्लवाः ५ द्रौण्यस्त्रविप्लुष्टमिदंमदंगंसंतानबीजंकुरुपांडवानां जुगोपकु
क्षिंगतआत्तचक्रोमातुश्चमेयःशरणंगतायाः ६ वीर्याणितस्याखिलदेहभाजामंतर्ब कृस
हिःपूरुषकालरूपैः प्रयछतोमृत्युमुतामृतंचमायामनुष्यस्यवदस्वविद्वन् ७ रोहिण्या १

स्तनयःप्रोक्तोरामःसंकर्षणस्त्वया देवक्यागर्भसंबंधःकुतोदेहांतरंविना ८ कस्मान्मु
कुंदोभगवान्पितुर्गेहाद्व्रजंगतः क्ववासंज्ञातिभिःसार्द्धंकृतवान्सात्वतांपतिः ९ व्रजेवस
न्किमकरोन्मधुपुर्यांचकेशवः भ्रातरंचावधीत्कंसंमातुरद्धातदर्हणम् १० देहंमानु
षमाश्रित्यकतिवर्षाणिवृष्णिभिः मधुपुर्य्यांसहावात्सीत्पत्न्यःकत्यभवत्प्रभोः ११ एतद
न्यच्चसर्वंमेमुनेःकृष्णविचेष्टितं वक्तुमर्हसिसर्वज्ञश्रद्दधानायविस्तृतं १२ नैषातिदुःस
हाक्षुन्मांत्यक्तोदमपिबाधते पिबंतंत्वन्मुखांभोजच्युतंहरिकथामृतं ॥१३॥ सूतउवाच
॥एवंनिशम्यभृगुनंदनसाधुवादंवैयासकिःसभगवानथविष्णुरातं॥प्रत्यर्च्यकृष्णचरितं
कलिकल्मषघ्नंव्याहर्तुमारभतभागवतप्रधानः ॥१४॥ श्रीशुक उवाच ॥ सम्यग्व्यवसिता
बुद्धिस्तवराजर्षिसत्तमः वासुदेवकथायांतेयज्जातानैष्ठिकीरतिः ॥ वासुदेवकथाप्रश्नःपु
रुषांस्त्रीन्पुनातिहि वक्तारंप्रछकंश्रोतृंस्तत्पादसलिलंयथा ॥१६॥ भूमिर्दृप्तनृपव्याज

Indira Gandhi National
Centre for the Arts

भा॰द॰ दैत्यानीकशतायुतैः आक्रान्ता भूमिभारेण ब्रह्माणं शरणं ययौ १७ गौर्भूत्वाश्रुमु पूजा॰
२ खी खिन्ना रुदन्ती करुणं विभोः उपस्थितान्तिके तस्मै व्यसनं स्वमवोचत १८ ब्रह्मा
तदुपधार्याथ सह देवैस्तया सह जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः १९ तत्र गत्वा
जगन्नाथं देवदेवं वृषाकपिं पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः २० गिरं समाधौ
गगने समीरितां निशम्य वेधास्त्रिदशानुवाच ह गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामा प्र
शु तथैव मा चिरं २१ पुरैव पुंसावधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यतां स यावदु
र्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयंश्चरेद्भुवि २२ वसुदेवगृहे साक्षात् भगवान् पु
पुरुषः परः जनिष्यते तत्प्रियार्थं संभवन्तु सुरस्त्रियः २३ वासुदेवकलानन्तः सहस्रव
दनः स्वराट् अग्रतो भविता देवो हरेः प्रियचिकीर्षया २४ विष्णोर्माया भगवती यया संमो कृष्ण॰
हितं जगत् आदिष्टा प्रभुणांशेन कार्यार्थे संभविष्यति २५ इत्यादि २

सोऽमरगणान्प्रजापतिपतिर्विभुः आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ २६ शूरसेनो
यदुपतिर्मथुरामावसन्पुरीं माथुरान् शूरसेनांश्च विषयान् बुभुजे पुरा २७ राजधानी त
तः साभूत्सर्वयादवभूभुजां मथुरा भगवान्यत्र नित्यं सन्निहितो हरिः २८ तस्यां तु कर्हि
चिच्छौरिर्वसुदेवः कृतोद्वहः देवक्या सूर्यया सार्द्धं प्रयाणे रथमारुहत् २९ उग्रसेनसु
तः कंसः स्वसुः प्रियचिकीर्षया रश्मीन् हयानां जग्राह रौक्मै रथशतैर्वृतः ३० चतुःश
तं पारिबर्हं गजानां हेममालिनां अश्वानामयुतं सार्द्धं रथानां च त्रिषट्शतं ३१ दासीनां सु
कुमारीणां द्वे शते समलंकृते दुहित्रे देवकः प्रादात् याने दुहितृवत्सलः ३२ शंखतूर्य
मृदंगाश्च नेदुर्दुंदुभयः समं प्रयाणप्रक्रमे तावत् वरवध्वोः सुमंगलं ३३ पथि प्रग्रहिणं
कंसमाभाष्याहाशरीरवाक् अस्यास्त्वामष्टमो गर्भो हन्ता यां वहसेऽबुधः ३४ इत्युक्तः स
खलः पापो भोजानां कुलपांसनः भगिनीं हन्तुमारब्धः खड्गपाणिः कचेऽग्रहीत् ३५ तं जु

Indira Gandhi National
Centre for the Arts

भा॰द॰ गुप्सितकर्माणं नृशंसं निरपत्रपं वसुदेवो महाभाग उवाच परिसांत्वयन् ॥३६॥ वसुदेव उवाच ॥ पूर्वा-
३ श्लाघनीयगुणः शूरैर्भवान्भोजयशस्करः स कथं भगिनीं हन्यात्स्त्रियमुद्वाहपर्वणि ३७ मृत्युर्ज
न्मवतां वीर देहेन सह जायते अद्य वाब्दशतांते वा मृत्युर्वै प्राणिनां ध्रुवः ३८ देहे पंचत्वमापन्ने दे
ही कर्मानुगोऽवशः देहांतरमनुप्राप्य प्राक्तनं त्यजते वपुः ३९ व्रजंस्तिष्ठन्पदैकेन यथैवै
केन गच्छति यथा तृणजलूकैवं देही कर्मगतिं गतः ४० स्वप्ने यथा पश्यति देहमीदृशं मनोरथे
नाभिनिविष्टचेतनः दृष्टश्रुताभ्यां मनसानुचिंतयन्प्रपद्यते तत्किमपि ह्यपस्मृतिः ४१ य
तो यतो धावति दैवचोदितं मनो विकारात्मकमाप पंचसु गुणेषु मायारचितेषु देह्यसौ प्रपद्य
मानः सह तेन जायते ४२ ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते ए
वं स्वमायारचितेष्वसौ पुमान्गुणेषु रागानुगतो विमुह्यति ४३ तस्मान्न कस्यचिद्द्रो कृष्ण
हमाचरेत्स तथाविधः आत्मनः क्षेममन्विच्छन्द्रोग्धुर्वै भयं ४४ एषा तवानुजा बा ३
परतो

पि२

ला कृपणा पुत्रिकोपमा हंतुं नार्हसि कल्याणीमिमां त्वं दीनवत्सलः ॥४५॥
एवं स सामभिर्भेदैर्बोध्यमानोऽपि दारुणः न न्यवर्तत कौरव्य पुरुषादाननु
व्रतः ४५ निर्बंधं तस्य तं ज्ञात्वा विचिंत्यानकदुंदुभिः प्राप्तं कालं प्रतिव्योढुमिदं तत्रान्व
१ व पद्यत ४६ मृत्युर्बुद्धिमतापोह्यो यावद्बुद्धिबलोदयं यद्यसौ न निवर्तेत नापराधोऽस्ति देहि
नः ४७ प्रदाय मृत्यवे पुत्रान्मोचये कृपणामिमां सुता मे यदि जायेरन्मृत्युर्वा न म्रियेत
चेत् ४८ विपर्ययो वा किं न स्याद्गतिर्धातुर्दुरत्यया उपस्थितो निवर्तेत निवृत्तः पुनरापतेत्
४९ अग्नेर्यथा दारुवियोगयोगयोरदृष्टतोऽन्यन्न निमित्तमस्ति एवं हि जंतोरपि दुर्विभाव्यः शरीर
संयोगवियोगहेतुः ५० श्रीशुक उवाच एवं विमृश्य तं पापं यावदात्मनि दर्शनं पूजयामा
स वै शौरिर्बहुमानपुरःसरं ५१ प्रसन्नवदनांभोजो नृशंसं निरपत्रपं मनसा दूयमानेन वि
हसन्निदमब्रवीत् ५२ वसुदेव उवाच न ह्यस्यास्ते भयं सौम्य यद्वै साहाऽशरीरवाक् पु

Indira Gandhi National
Centre for the Arts

भा॰द॰ त्रान्समर्पयिष्येऽस्यायतस्तेभयमागतं ५४ श्रीशुकउवाच स्वसुर्वधान्निवृत्तेकंसस्त पूर्वा
४ द्वाक्यसारवित् वसुदेवोपितंप्रीतःप्रशंस्यप्राविशद्गृहं ५५ अथकालउपावृत्तेदेव
कीसर्वदेवता पुत्रान्प्रसुषुवेचाष्टौकन्यांचैवानुवत्सरं ५६ कीर्तिमंतंप्रथमजंकंस
यानकदुंदुभि अर्पयामासकृच्छ्रेणसोनृतादतिविह्वलः ५७ किंदुःसहंनुसाधूनांवि
दुषांकिमपेक्षितं किमकार्यंकदर्याणांदुस्त्यजंकिंधृतात्मनां ५८ दृष्ट्वासमत्वंतच्छौ
रेःसत्येचैवव्यवस्थितिं कंसस्तुष्टमनाराजन्प्रहसन्निदमब्रवीत् ५९ प्रतियातुकु
मारोयंनह्यस्मादस्तिमेभयं अष्टमाद्युवयोःपुत्रान्मृत्युर्मेविहितःकिल ६० तथेति
सुतमादायययावानकदुंदुभिः नाभ्यनंदतत द्वाक्यमसतोविजितात्मनः ६१ नंदाद्या
येव्रजेगोपायाश्चामीषांचयोषितः वृष्णयोवसुदेवाद्यादेवक्याद्यायदुस्त्रियः ६२ स कृष्ण
र्वे देवताप्रायाउभयोरपिभारत ज्ञातयोबंधुसुहृदोयेचकंसमनुव्रताः ६३ गतेथ ४

वसुदेवेतुदेवकार्यार्थमुद्यतः एतत्कंसायभगवान्छशंसाभेत्यनारदः ६५ भूमेर्भारायं
माणानांदैत्यानांचवधोद्यमं ऋषेर्विनिर्गमेकंसोयदून्मत्वासुरानिति देवक्यागर्भसंभूतं
विष्णुंचस्ववधंप्रति ६६ देवकींवसुदेवंचनिगृह्यनिगडैर्गृहीत् जातंजातमहन्पुत्रंतयोर
जनशंकया ६७ मातरंपितरंभ्रातॄन्सर्वांश्चसुहृदःसखीन् घ्नंतिसुतृपोलुब्धाराजानः
प्रायशोभुवि ६८ आत्मानमिहसंजातंजानन्प्राकविष्णुनाहतं महासुरंकालनेमिंयदुभिः
सव्यरुध्यत ६९ उग्रसेनंचपितरंयदुभोजांधकाधिपं स्वयंनिगृह्यबुभुजेशूरसेनान्महा
बलः ७० इतिश्रीभागवतेमहापुराणेदशमस्कंधेकृष्णावतारोनामप्रथमोध्यायः १ श्री
शुकउवाच प्रलंबबकचाणूरतृणावर्तमहाशनैः मुष्टिकारिष्टद्विविदपूतनाकेशिधेनु
कैः १ अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः यदूनांकदनंचक्रेबलीमागधसंश्रयः २ ते
पीडितानिविविशुःकुरुपांचालकेकयान् शाल्वान्विदर्भान्निषधान्विदेहान्कोशलानपि

Indira Gandhi National
Centre for the Arts

भा·द· ३ एकेतमनुरुध्वानाज्ञातयःपर्युपासते मथुरायांस्थिताश्चैवयेक्रूराद्याविशांपते ४ पूर्वा·
५ हतेषुषट्सुबालेषुदेवक्याश्रोग्रसेनिना सप्तमोवैष्णवंधामयमनंतंप्रचक्षते गर्भोव
भूवदेवक्याहर्षशोकविवर्द्धनः ५ भगवानपिविश्वात्माविदित्वाकंसजंभयं यदूनां।
निजनाथानांयोगमायांसमादिशत ६ गच्छदेविव्रजंभद्रेगोपगोभिरलंकृतं रोहिणी
वसुदेवस्यभार्यास्तेनंदगोकुले ७ अन्याश्चकंससंविग्नाविवरेषुवसंतिहि देवक्याज
ठरेगर्भंशेषाख्यंधाममामकं ८ तत्संनिकृष्यरोहिण्याउदरेसंनिवेशय अथाहमंश
भागेनदेवक्याःपुत्रतांशुभे ९ प्राप्स्यामित्वंयशोदायांनंदपत्न्यांभविष्यसि अर्चिष्यं
तिमनुष्यास्त्वांसर्वकामवरेश्वरीं धूपोपहारबलिभिःसर्वकामवरप्रदां १० नामधेयानि
कुर्वंतिस्थानानिचनराभुवि दुर्गेतिभद्रकालीतिविजयावैष्णवीतिच ११ कुमुदाचंडि कृष्ण·
काकृष्णामाधवीकन्यकेतिच मायानारायणीशानीशारदेत्यंबिकेतिच १२ गर्भसंकर्ष ५

न·
णात्तंवैप्राहुःसंकर्षणंभुवि रामेतिलोकरमणाद्बलभद्रंबलोच्छ्रया १३ श्रीशुकउवाच
संदिष्टेवंभगवतातथेत्योमितितद्वचः प्रतिगृह्यपरिक्रम्यगांगतातत्तथाकरोत् १४ गर्भेप्र
णीतेदेवक्यारोहिणींयोगनिद्रया अहोविस्रंसितोगर्भइतिपौराविचुक्रुशुः १५ भगवानपि
विश्वात्माभक्तानामभयंकरः आविवेशांशभागेनमनआनकदुंदुभेः १६ सबिभ्रत्पौरुषं
धामभ्राजमानोयथारविः दुरासदोतिदुर्धर्षोभूतानांसबभूवह १७ ततोजगन्मंगलम
च्युतांशंसमाहितंशूरसुतेनदेवी दधारसर्वात्मकमात्मभूतंकाष्ठायथानंदकरंमनस्तः १८
सादेवकीसर्वजगन्निवासनिवासभूतासुतरांनरेजे भोजेंद्रगेहेग्निशिखेवरुध्वासरस्वती
ज्ञानखलेयथासती १९ तांवीक्ष्यकंसःप्रभयाजितांतरांविरोचयंतींभवनंशुचिस्मितां
आहैषमेप्राणहरोहरिर्गुहांध्रुवंश्रितोयन्नपुरेयमीदृशी २० किमद्यतस्मिन्करणीय
माशुमेयदर्थतंत्रोनविहंतिविक्रमं स्त्रियःस्वसुर्गुरुमत्यावधोयंयशःश्रियंहंत्यनुकाल

Indira Gandhi National
Centre for the Arts

भा॰द॰ माथुः २१ स्वयंसजीवंखलुसंपरेतोवर्त्ततियोत्यंतनृशंसितेन देहेमृतेतंमनुजाःशपंतिगं पूर्वा
६ न्तातमोंधंतनुमानिनोध्रुवं २२ इतिघोरतमाद्भावात्संनिवृत्तःस्वयंप्रभुः आस्तेप्रतीक्षं
तज्जन्महरेर्वैरानुबंधकृत् २३ आसीनःसंविशंस्तिष्ठन्भुंजानःपर्यटन्महीं चिंतयानो
हृषीकेशमपश्यत्तन्मयंजगत् २४ ब्रह्माभवश्चतत्रैत्यमुनिभिर्नारदादिभिः देवैःसानुच
रैःसाकंगीर्भिर्वृषणमैडयन् २५ ब्रह्मादयऊचुः सत्यव्रतंसत्यपरंत्रिसत्यंसत्यस्ययोनिंनि
हितंचसत्ये सत्यस्यसत्यमृतसत्यनेत्रंसत्यात्मकंत्वांशरणंप्रपन्नाः २६ एकायनोऽसौद्विफ
लस्त्रिमूलश्चतूरसःपंचविधःषडात्मा सप्तत्वगष्टविटपोनवाक्षोदशछदीद्विखगोह्या
दिवृक्षः २७ त्वमेकएवास्यसतःप्रसूतिस्त्वंसंनिधानंत्वमनुग्रहश्च त्वन्माययासंवृतचेत
सस्त्वांपश्यंतिनानानविपश्चितोये २८ बिभर्षिरूपाण्यवबोधआत्माक्षेमायलोकस्यचरा कृष्ण
चरस्य सत्वोपपन्नानिसुखावहानिसतामभद्राणिमुहुःखलानां २९ त्वय्यंबुजाक्षाखिलसत्व ६

ति व

त्वधाम्निसमाधिनावेशितचेतसैके त्वत्पादपोतेनमहत्कृतेन कुर्वंतिगोवत्सपदंभवाब्धिं
३० स्वयंसमुत्तीर्यसुदुस्तरंद्युमन्भवार्णवंभीममदभ्रसौहृदाः भवत्पदांभोरुहनावमत्रते
निधाययाताःसदनुग्रहोभवान् ३१ येन्येरविंदाक्षविमुक्तमानिनस्त्वय्यस्तभावादविशुद्ध
बुद्धयः आरुह्यकृच्छ्रेणपरंपदंततःपतंत्यधोऽनादृतयुष्मदंघ्रयः ३२ तथानतेमाधवता
वकाःक्वचित्भ्रश्यंतिमार्गात्त्वयिबद्धसौहृदाः त्वयाभिगुप्ताविचरंतिनिर्भयाविनायका
नीकपमूर्द्धसुप्रभो ३३ सत्वंविशुद्धंश्रयतेभवान्स्थितौशरीरिणांश्रेयउपायनंवपुः वे
दक्रियायोगतपःसमाधिभिस्तवार्हणंयेनजनःसमीहते ३४ सत्वंनचेद्धातरिदंनिजंभवेद्वि
ज्ञानमज्ञानभिदापमार्जनं गुणप्रकाशैरनुमीयतेभवान्प्रकाशतेयस्यचयेनवागुणः ३
५ ननामरूपेणकर्मजन्मभिर्निरूपतव्येतवतस्यसाक्षिणः मनोवचोभ्यामनुमेयवर्त्मनो
देवक्रियायांप्रतियंत्यथापिहि ३६ शृण्वन्गृणन्संस्मरयंश्चचिंतयन्नामानिरूपाणिच

Indira Gandhi National
Centre for the Arts

भ०

भा०द० मंगलानि ते क्रियासु मस्व चरणारविंदयोराविष्टचित्तो न भवाय कल्पते ३७ दिष्ट्याहरेऽस्या भवतः पदोभुवो भारोपनीतस्तव जन्मनेशितुः दिष्ट्यांकितां त्वत्पदकैः सुशोभनैर्द्रक्ष्याम गां द्यां
७ च तवानुकंपितां ३८ न तेभवस्येश भवस्य कारणं विना विनोदं बत तर्कयामहे भवो निरोधः
स्थितिरप्यविद्यया कृता यतस्त्वय्यभयाश्रयात्मनि ३९ मत्स्याश्वकच्छपवराहनृसिंहहंसरा
जन्यविप्रविबुधेषु कृतावतारः त्वं पासि नस्त्रिभुवनं च तथाधुनेश भारं भुवो हर यदूत्तम
वंदनं ते ४० दिष्ट्याम्ब ते कुक्षिगतः परः पुमानंशेन साक्षाद्भगवान्भवाय नः माभूद्भयं भो
जपतेर्मुमूर्षोर्गोप्ता यदूनां भविता तवात्मजः ४१ श्रीशुक उवाच इत्यभिष्टूय पुरुषं यद्रूपम
निदं यथा ब्रह्मेशानौ पुरोधाय देवाः प्रतिययुर्दिवं ४२ इति श्रीभागवते महापुराणे दश
मस्कंधे गर्भगतविष्णोः कृतब्रह्मस्तुतिर्द्वितीयोध्यायः २ श्रीशुक उवाच अथ सर्वगुणोपे कृष्ण०
तः कालः परमशोभनः यर्ह्येवाजनजन्मर्क्षं शांतर्क्षग्रहतारकं १ दिशः प्रसेदुर्गगनं निर्म ७

लोडुगणोदयं महीमंगलभूयिष्ठपुरग्रामव्रजाकराः २ नद्यः प्रसन्नसलिला ह्रदा जलरुहश्रि
यः द्विजालिकुलसन्नादस्तवका वनराजयः ३ ववौ वायुः सुखस्पर्शः पुण्यगंधवहः शुचिः अ
ग्नयश्च द्विजातीनां शांतास्तत्र समिंधत ४ मनांस्यासन्प्रसन्नानि साधूनामसुरद्रुहां जायमा
नेजने तस्मिन्नेदुर्दुंदुभयो दिवि ५ जगुः किन्नरगंधर्वास्तुष्टुवुः सिद्धचारणाः विद्याधर्यश्च न
नृतुरप्सरोभिः समं मुदा ६ मुमुचुर्मुनयो देवाः सुमनांसि मुदान्विताः मंदं मंदं जलधरा जगर्जुर
नुसागरं ७ निशीथे तमउद्भूते जायमाने जनार्दने देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः
आविरासीद्यथा प्राच्यां दिशींदुरिव पुष्कलः ८ तमद्भुतं बालकमंबुजेक्षणं चतुर्भुजं शंखग
दाद्युदायुधं श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं पीतांबरं सांद्रपयोदसौभगं ९ महार्हवैदूर्यकि
रीटकुंडलत्विषा परिष्वक्तसहस्रकुंतलं उद्दामकांच्यंगदकंकणादिभिर्विरोचमानं वसुदे
व ऐक्षत १० स विस्मयोत्फुल्लविलोचनो हरिं सुतं विलोक्यानकदुंदुभिस्तदा कृष्णावतारो

Indira Gandhi National
Centre for the Arts

भा॰द॰ त्सवसंभ्रमोऽस्पृशन्मुदा द्विजेभ्योऽयुतमाप्लुतो गवां ११ अथैनमस्तौदवधार्य पूरुषं परं नतांगः कृ पूर्वा॰
८ तधीः कृतांजलिः स्वरोचिषा भारत सूतिकागृहं विरोचयंतं गतभीः प्रभाववित् १२ वसुदेव उ
वाच । विदितोसि भवान्साक्षात्पुरुषः प्रकृतेः परः केवलानुभवानंदस्वरूपः सर्वबुद्धिदृक्
१३ स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकं तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे १४ य
थेमे विकृता भावास्तथा ते विकृतैः सह नानावीर्याः पृथग्भूता विराजं जनयंति हि १५ सं
निपत्य समुत्पाद्य दृश्यंतेनुगता इव प्रागेव विद्यमानत्वान्न तेषामिह संभवः १६ एवं भवा
न्बुध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैः सन्नपि तद्गुणाग्रहः अनावृतत्वाद्बहिरंतरं न ते सर्वस्य
सर्वात्मन आत्मवस्तुनः १७ य आत्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतो
बुधः विनानुवादं भवतं मनीषितं सम्यक्यतस्त्यक्तमुपाददत्पुमान् १८ त्वत्तोस्य जन्मस्थि कृष्ण॰
तिसंयमान्विभो वदंत्यनीहादगुणादविक्रियात् त्वयीश्वरे ब्रह्मणि नो विरुध्यते त्व ८

दाश्रयत्वादुपचर्यते गुणैः १९ स त्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्
मनः सर्गाय रक्तं रजसोपबृंहितं कृष्णं च वर्णं तमसा जनात्यये २० त्वमस्य लोकस्य विभो
रिरक्षिषुर्गृहेवतीर्णोसि ममाखिलेश्वरः राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमानानि
हनिष्यसे चमूः २१ अयं त्वसभ्यस्तव जन्म नौ गृहे श्रुत्वाग्रजांस्ते न्यवधीत्सुरेश्वरः स ते
वतारं पुरुषैः समर्पितं श्रुत्वाधुनैवाभिसरत्युदायुधः २२ श्रीशुक उवाच अथैनमात्म
५ व जं वीक्ष्य महापुरुषलक्षणं देवकी तमुपाधावत्कंसाद्भीता शुचिस्मिता २३ देवक्युवा
च रूपं यत्तत्प्राहुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारं सत्तामात्रं निर्विशेषं निरीहं स
त्वं साक्षाद्विष्णुरध्यात्मदीपः २४ नष्टे लोके द्विपरार्धावसाने महाभूतेष्वादिभूतं गतेषु
व्यक्तेव्यक्तं कालवेगेन याते भवानेकः शिष्यते शेषसंज्ञः २५ योयं कालस्तस्य तेऽव्यक्त
बंधो चेष्टामाहुश्चेष्टते येन विश्वं निमेषादिर्वत्सरांतो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये

Indira Gandhi National Centre for the Arts

भा.द. २६ मर्त्योमृत्युव्यालभीतःपलायन्सर्वान्लोकान्निर्भयंनाधिगच्छन् त्वत्पादाब्जंप्राप्य पूर्वा.
९ यदृच्छयाद्यस्वस्थःशेतेमृत्युरस्मादपैति २७ सत्वंघोरादुग्रसेनात्मजान्नस्त्राहित्रस्तान्भृत्य
वित्रासहासि रूपंचेदंपौरुषंध्यानधिष्ण्यंमाप्रत्यक्षंमांसदृशांत्वंकृषीष्ठाः २८ जन्मतेमय्य
सौपापोमाविद्यान्मधुसूदनः समुद्विजेभवद्धेतोःकंसादहमधीरधीः २९ उपसंहरविश्वा
त्मन्नदोरूपमलौकिकं शंखचक्रगदापद्मश्रियाजुष्टंचतुर्भुजं ३० विश्वंयदेतत्स्वतनौ
निशांतेयथावकाशंपुरुषःपरोभवान् बिभर्तिसोयंममगर्भगोभूदहोनृलोकस्यविडंबनं
महत् ३१ श्रीभगवानुवाच त्वमेवपूर्वसर्गेभूःपृश्निःस्वायंभुवेसति तदायंसुतपानाम
प्रजापतिरकल्मषः ३२ युवांवैब्रह्मणादिष्टौप्रजासर्गेयदाततः सन्नियम्येंद्रियग्रामंते
पाथेपरमंतपः ३३ वर्षवातातपहिमघर्मकालगुणाननु सहमानौश्वासरोधविनिर्धूतम कृष्ण
नोमलौ ३४ शीर्णपर्णानिलाहारावुपशांतेनचेतसा मत्तःकामानभीप्संतौमदाराधनमी ९

हतुः ३५ एवंवांतप्यतोस्तीव्रंतपःपरमदुष्करं दिव्यवर्षसहस्राणिद्वादशेयुर्मदात्मनो ३६
तदावांपरितुष्टोहममुनावपुषानघे तपसाश्रद्धयानित्यंभक्त्याचहृदिभावितः ३७ प्रादुरा
संवरदराड्युवयोःकामदित्सया व्रियतांवरइत्युक्तेमादृशोवांवृतःसुतः ३८ अजुष्टग्रा
म्यविषयावनपत्यौचदंपती नवव्राथेपवर्गंमेमोहितौममायया ३९ गतेमयियुवां
लब्ध्वावरंमत्सदृशंसुतं ग्राम्यान्भोगानभुंजाथांयुवांप्राप्तमनोरथौ ४० अदृष्ट्वान्यतमं
लोकेशीलौदार्यगुणैःसमं अहंसुतोवामभवंपृश्निगर्भइतिश्रुतः ४१ तयोर्वांपुनरेवाहम
दित्यामासकश्यपात् उपेंद्रइतिविख्यातोवामनत्वाच्चवामनः ४२ तृतीयेस्मिन्भवेहं
वैतेनैववपुषायुवां जातोभूयस्तयोरेवसत्यंमेव्याहृतंसति ४३ एतद्वांदर्शितंरूपंप्राग्ज
न्मस्मरणायते नान्यथामद्भवंज्ञानंमर्त्यलिंगेनजायते ४४ युवांमांपुत्रभावेनब्रह्मभावेनचा
सकृत् चिंतयन्तौकृतस्नेहौयास्येतेमद्गतिंपरां ४५ श्रीशुकउवाच इत्युक्त्वासीद्धरिस्तूष्णीं

Indira Gandhi National
Centre for the Arts

भा॰ द॰ भगवानात्ममायया पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः ४६ ततश्च शौरिर्भगवत् पूर्वा॰
१० प्रचोदितः सुतं समादाय स सूतिकागृहात् यदा बहिर्गंतुमियेष तर्ह्यजा या योगमायाजनि
नंदजायया ४७ तया हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु पौरेष्वपि शायितेष्वथ द्वारस्तु सर्वेपि
हिता दुरत्यया बृहत्कपाटायसकीलशृंखलैः ४८ ताः कृष्णवाहे वसुदेव आगते स्वयंव्यवरी
र्यंत यथा तमो रवेः ववर्ष पर्जन्य उपांशुगर्जितः शेषोन्वगाद्वारि निवारयन् फणैः ४९
मघोनि वर्षत्यसकृद्यमानुजा गंभीरतोयौघजवोर्मिफेनिला भयानकावर्त्तशतानेदीकु
लानदी मार्गं ददौ सिंधुरिव श्रियः पतेः ५० नंदव्रजं शौरिरुपेत्य तत्र तान् गोपान् प्रसुप्ता
नुपलभ्य निद्रया शिशुं यशोदाशयने निधाय तत्सुतामुपादाय पुनर्गृहानगात् ५१ देवक्याः
शयने न्यस्य वसुदेवोथ दारिकां प्रतिमुच्य पदोर्लोहमास्ते पूर्ववदावृतः ५२ यशोदा नंद कृष्ण॰
पत्नी च जातं परमबुध्यत न तल्लिंगं परिश्रांता निद्रयापगतस्मृतिः ५३ इति श्रीभागवते महा १०

पुराणे दशमस्कंधे श्रीकृष्णजन्मनि तृतीयोध्यायः ३ श्रीशुक उवाच बहिरंतःपुरद्वारः
सर्वाः पूर्ववदावृताः ततो बालध्वनिं श्रुत्वा गृहपालाः समुत्थिताः १ ते तु तूर्णमुपव्रज्य
देवक्या गर्भजन्म तत् आचख्युर्भोजराजाय यदुद्विग्नः प्रतीक्ष्यते २ स तल्पात्तूर्णमुत्था
य कालोयमिति विह्वलः सूतीगृहमगात्तूर्णं प्रस्खलन्मुक्तमूर्धजः ३ तमाह भ्रातरं दे
वी कृपणा करुणं सती स्नुषेयं तव कल्याण स्त्रियं मा हंतुमर्हसि ४ बहवो हिंसिता
भ्रातः शिशवः पावकोपमाः त्वया दैवनिसृष्टेन पुत्रिकैका प्रदीयतां ५ नन्वहं ते ह्यवरजा
दीना हतसुता प्रभो दातुमर्हसि मंदाया अंगेमां चरमां प्रजां ६ श्रीशुक उवाच उपगुह्या
त्मजामेवं रुदत्या दीनदीनवत् याचितस्तां विनिर्भर्त्स्य हस्तादाचिच्छिदे खलः ७ तां गृहीत्वा
चरणयोर्जातमात्रां स्वसुः सुतां अपोथयच्छिलापृष्ठे स्वार्थोन्मूलितसौहृदः ८ सा तद्धस्ता
त्समुत्पत्य सद्यो देव्यंबरं गता अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा ९ दिव्यस्रगंबर

Indira Gandhi National
Centre for the Arts

भा॰द॰ रालेपरत्नाभरणभूषिता धनुःशूलेषुचर्मासिशंखचक्रगदाधरा १० सिद्धचारणगंधर्वैर पूर्वा·
११ प्सरैःकिन्नरोरगैः उपाहृतोरुबलिभिःस्तूयमानेदमब्रवीत् ११ श्रीचंडिकोवाच कि
मयाहतयामंदजातःखलुतवांतकृत् यत्रक्ववापूर्वशत्रुर्माहिंसीःकृपणायथा १२ इति
प्रभाष्यतंदेवीमायाभगवतीभुवि बहुनामानिकेतेषुबहुनामाबभूवह १३ तयाभिहि
तमाकर्ण्यकंसःपरमविस्मितः देवकीवसुदेवंचविमुच्यप्रश्रितोब्रवीत् १४ कंसउवाच
अहोभगिन्यहोभाममयावांतवपाप्मना पुरुषादइवाभ्येत्यबहवोहिंसिताःसुता १५ स
त्वहंत्यक्तकारुण्यस्त्यक्तज्ञातिसुहृत्खलः कांलोकान्वैगमिष्यामिब्रह्महेवमृतःश्वस
न् १६ दैवमप्यनृतंवक्तिनमर्त्याइवकेवलं यद्विश्रंभादहंपापःस्वसुर्निहतवान्शिशून्
१७ माशोचतंमहाभागावात्मजान्स्वकृतंभुजः जंतवोनसदैकत्रदैवाधीनासहासते १८ भुवि क्रम
भौमानिभूतानियथायांत्यपयांतिच नायमात्मातथैतेषुविपर्येतियथैवभूः १९ यथा ११

नैवंविदोभेदोयतआत्मविपर्ययः देहयोगवियोगौचसंसृतिर्ननिवर्तते २० तस्माद्भद्रे स्व
तनयान्मयाव्यापादितानपि मानुशोचयतःसर्वेःस्वकृतंविंदतेवशाः २१ यावद्धतोस्मिहं
तास्मीत्यात्मानंमन्यतेस्वदृक् तावत्तदभिमान्यज्ञोबाध्यबाधकतामियात् २२ क्षमध्वंम
ममदौरात्म्यंसाधवोदीनवत्सलाः इत्युक्त्वाश्रुमुखःपादौश्यालःस्वस्रोरथाग्रहीत् २३ मो
चयामासनिगडाद्विश्रब्धःकन्यकागिराः देवकीवसुदेवंचदर्शयन्नात्मसौहृदं २४ भ्रातुः
समनुतप्तस्यक्षांतरोषाचदेवकी व्यसृजद्वसुदेवश्चप्रहस्यतमुवाचह २५ वसुदेवउवाच
एवमेतन्महाभागयथावदसिदेहिनां अज्ञानप्रभवाहंधीःस्वपरेतिभिदायतः २६ शोक
हर्षभयद्वेषलोभमोहमदान्विताः मिथोघ्नंतंनपश्यंतिभावैर्भावंपृथग्दृशः २७ श्रीशुकउवा
च कंसएवंप्रसन्नाभ्यांविशुद्धंप्रतिभाषितः देवकीवसुदेवाभ्यामनुज्ञातोविशद्गृहं २८ तस्यां
रात्र्यांव्यतीतायांकंसआहूयमंत्रिणः तेभ्यआचष्टतत्सर्वंयदुक्तंयोगमायया २९ आकर्ण्य

Indira Gandhi National
Centre for the Arts

भा·द· भर्तुर्गृहीतं तमूचुर्देवशत्रवः देवान्प्रतिकृतामर्षा दैतेया नातिकोविदाः ३० एवं चेत्तर्हि भो पूर्वा
१२ जेंद्र पुरग्रामव्रजादिषु अनिर्दशान्निर्दशांश्च हनिष्यामोद्य वै शिशून् ३१ किमुद्यमैः करि
ष्यंति देवाः समरभीरवः नित्यमुद्विग्नमनसो ज्याघोषैर्धनुषस्तव ३२ अस्यतस्ते शरव्रातैर्ह
न्यमाना समंततः जिजीविषव उत्सृज्य पलायनपरा ययुः ३३ केचित्प्रांजलयो दीना न्यस्तशस्त्रा
दिवौकसः मुक्तकच्छशिखाः केचिद्भीताः स्म इति वादिनः ३४ न त्वं विस्मृतशस्त्रास्त्रान्विरथा
न्भयसंवृतान् हंस्यन्यासक्तविमुखान्भग्नचापानयुध्यतः ३५ किं क्षेमशूरैर्विबुधैरसं
युगविकत्थनैः रहोजुषा किं हरिणा शंभुना वा वनौकसा ३६ किमिंद्रेणाल्पवीर्येण ब्र
ह्मणा वा तपस्यता तथापि देवाः सापत्न्यान्नोपेक्ष्या इति मन्महे ३७ ततस्तन्मूलखनने नि
युंक्ष्वास्माननुव्रतान् यथामयोंगे समुपेक्षितो नृभिर्न शक्यते रूढपदश्चिकित्सितुं यथें रूप्रा
द्रियग्राम उपेक्षितस्तथा रिपुर्महान्बद्धबलो न चाल्यते ३८ मूलं हि विष्णुर्देवानां यत्र धर्मः १२

सनातनः तस्य च ब्रह्मगोविप्रास्तपो यज्ञाः सदक्षिणाः ४० तस्मात्सर्वात्मना राजन्ब्राह्मणा
न्ब्रह्मवादिनः तपस्विनो यज्ञशीलान्गाश्च हन्मो हविर्दुघाः ४१ विप्रा गावश्च वेदाश्च तपः सत्यं द
मः शमः श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनूः ४२ स हि सर्वसुराध्यक्षो ह्यसुरद्विड्गुहाशयः
तन्मूला देवताः सर्वाः सेश्वराः सचतुर्मुखाः ४३ अयं वै तद्वधोपायो यदृषीणां विहिंसनं ४३ श्री
शुक उवाच एवं दुर्मंत्रिभिः कंसः सह संमंत्र्य दुर्मतिः ब्रह्महिंसां हितं मेने कालपाशावृतोसुरः न ५
४४ संदिश्य साधुलोकस्य कदने कदनप्रियान् कामरूपधरान्दिक्षु दानवान्गृहमाविशत्
४५ ते वै रजःप्रकृतयस्तमसा मूढचेतसः सतां विद्वेषमाचेरुरारादागतमृत्यवः ४६ आयुः श्रि
यं यशो धर्मं लोकानाशिष एव च हंति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ४७ इति
श्रीभागवते महापुराणे दशमस्कंधे असुरमंत्रनिश्चयो नाम चतुर्थोध्यायः ४ श्रीशुक उवाच नं
दस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः आहूय विप्रान्वेदज्ञान्स्नातः शुचिरलंकृतः १

Indira Gandhi National
Centre for the Arts

भा॰द॰ वाचयित्वास्वस्त्ययनंजातकर्मात्मजस्यवैः कारयामासविधिवत्पितृदेवार्चनंतथा २ पूर्वा॰
१५ धेनूनांनियुतेप्रादाद्विप्रेभ्यःसमलंकृते तिलाद्रीन्सप्तरत्नौघान्शातकौंभांबराकृतान्
३ कालेनस्नानशौचाभ्यांसंस्कारैस्तपसेज्यया शुध्यंतिदानैःसंतुष्ट्याद्रव्याण्यात्मात्म
विद्यया ४ सौमंगल्यगिरोविप्राःसूतमागधवंदिनः गायकाश्चजगुर्नेदुर्भेर्योदुंदुभयो
मुहुः ५ व्रजःसंमृष्टसंसिक्तद्वाराजिरगृहांतरः चित्रध्वजपताकास्रक्चैलपल्लवतोरणैः
६ गावोवृषावत्सतराहरिद्रातैलभूषिताः विचित्रधातुवर्हस्रग्वस्त्रकांचनमालिनः ७
महार्हवस्त्राभरणकंचुकोष्णीषभूषिताः गोपाःसमाययुराजन्नानोपायनपाणयः ८
गोप्यश्चाकर्णमुदितायशोदायाःसुतोद्भवं आत्मानंभूषयांचक्रुर्वस्त्राकल्पांजनादि
भिः ९ नवकुंकुमकिंजल्कमुखपंकजभूतयः बलिभिस्त्वरितंजग्मुःपृथुश्रोण्यश्चलत्कु कृष्ण
चाः १० गोप्यःसुमृष्टमणिकुंडलनिष्ककंठ्यश्चित्रांबरापथिशिखाच्युतमाल्यवर्षाः नंदा १३

लयंसवलयोव्रजतीर्विरेजुर्व्यालोलकुंडलपयोधरहारशोभाः ११ ताआशिषःप्रयुंजाना
श्चिरंपाहीतिबालके हरिद्राचूर्णतैलाद्भिःसिंचंत्योजनमुज्जगुः १२ अवाद्यंतविचित्राणि
वादित्राणिमहोत्सवे कृष्णेविश्वेश्वरेनंतेनंदस्यव्रजमागते १३ गोपाःपरस्परंहृष्टादधिक्षी
रघृतांबुभिः आसिंचंत्योविलिंपंत्योनवनीतैश्चचिक्षिपुः १४ नंदोमहामनास्तेभ्योवासोलं
कारगोधनं सूतमागधवंदिभ्योयेन्योविद्योपजीविनः १५ तैस्तैःकामैरदीनात्मायथोचि
तमपूजयत् विष्णोराराधनार्थायस्वपुत्रस्योदयायच १६ रोहिणीचमहाभागानंदगोपाभि
नंदिता व्यचरद्दिव्यवासःस्रक्कंठाभरणभूषिता १७ ततआरभ्यनंदस्यव्रजःसर्वसमृद्धिमा
न् हरेर्निवासात्मगुणैरमाक्रीडमभून्नृपः १८ गोपान्गोकुलरक्षायांनिरूप्यमथुरांगतः नं
दःकंसस्यवार्षिक्यंकरंदातुंकुरूद्वह १९ वसुदेवउपश्रुत्यभ्रातरंनंदमागतं ज्ञात्वादत्तकरंरा
ज्ञेययौतदवमोचनं २० तंदृष्ट्वासहसोत्थायदेहप्राणमिवागतं प्रीतःप्रियतमंदोर्भ्यांसस्व

Indira Gandhi National
Centre for the Arts

भा॰द॰ जेप्रेमविह्वलः २१ पूजितःसुखमासीनःपृष्ट्वानामयमादृतः प्रसक्तधीःस्वात्मजयोरिदं पूर्वा॰
२४ माहविशांपते २२ दिष्ट्याभ्रातःप्रवयसइदानीमप्रजस्यते प्रजाशायानिवृत्तस्यप्रजायत्समुप
स्थितः २३ दिष्ट्यासंसारचक्रेस्मिन्वर्त्तमानःपुनर्भवः उपलब्धोभवानद्यदुर्लभंप्रियदर्शनं
२४ नैकत्रप्रियसंवासःसुहृदांचित्रकर्मणां ओघेनव्यूह्यमानानांप्लवानांस्रोतसोयथा
२५ कच्चित्पशव्यंनिरुजंभूर्यंबुतृणवीरुधं बृहद्वनंतदधुनायत्रास्तेत्वंसुहृद्वृतः २६
भ्रातर्ममसुतःकच्चिन्मात्रासहभवद्व्रजे तातंभवंतंमन्वानोभवद्भ्यामुपलालितः २७ पुं
सस्त्रिवर्गोविहितःसुहृदोह्यनुभावितः नतेषुक्लिश्यमानेषुत्रिवर्गोर्थायकल्पते २८ नंद
उवाच अहोतेदेवकीपुत्राःकंसेनबहवोहताः एकावशिष्टावरजाकन्यासापिदिवंगता
२९ नूनंह्यदृष्टनिष्ठोयमदृष्टपरमोजनः अदृष्टमात्मनस्तत्त्वंयोवेदनसमुह्यति ३० वसुदे कृष्ण
वउवाच करोवैवार्षिकोदत्तोराज्ञेदृष्टावयंचवः नेहस्थेयंबहुतिथंसंत्युत्पाताश्चगोकुले १५

३१ श्रीशुकउवाच इतिनंदादयोगोपाःप्रोक्तास्तेशौरिणाययुः अनोभिरनडुद्युक्तैस्तमनु
ज्ञाप्यगोकुलं ३२ इतिश्रीभागवतेमहापुराणेदशमस्कंधेवसुदेवसंगमोनामपंचमोध्याय
: ५ श्रीशुकउवाच नंदःपथिवचःशौरेर्नमृषेतिविचिंतयन् हरिंजगामशरणमुत्पाता
गमशंकितः १ कंसेनप्रहिताघोरापूतनाबालघातिनी शिशूंश्चचारनिघ्नंतीपुरग्रामव्र
जादिषु २ नयत्रश्रवणादीनिरक्षोघ्नानिस्वकर्मसु कुर्वंतिसात्वतांभर्तुर्यातुधान्यश्चतत्रहि
३ साखेचर्येकदोपेत्यपूतनानंदगोकुलं योषित्वामाययात्मानंप्राविशत्कामचारिणी
४ तांकेशबंधव्यतिषक्तमल्लिकांबृहन्नितंबस्तनकृच्छ्रमध्यमां सुवाससंकंपितकर्ण
भूषणत्विषोल्लसत्कुंतलमंडिताननां ५ वल्गुस्मितापांगविसर्गवीक्षितैर्मनोहरंतींवनि
तांव्रजौकसां अमंसतांभोजकरेणरूपिणींगोप्यःश्रियंद्रष्टुमिवागतांपतिं ६ बालग्रह
स्तत्रविचिन्वतीशिशून्यदृच्छयानंदगृहेसदंतकं बालंप्रतिच्छन्ननिजोरुतेजसंददर्शतल्पे

Indira Gandhi National
Centre for the Arts

भा-द- ग्निमिवाहितं भस्मनि ७ विबुध्य तां बालकमारिकाग्रहं चराचरात्मा स निमीलितेक्षणः अनंतमा पूर्वा·
२५ रोपयदंकमंतकं यथोरगं सुप्तमबुद्धिरज्जुधी ८ तां तीक्ष्णचित्तामतिवामचेष्टितां वीक्ष्यांतरा
कोशपरिच्छदासिवत् वरस्त्रियं तत्प्रभया च धर्षिते निरीक्ष्यमाणे जननी ह्यतिष्ठतां ९ तस्मि
न्स्तनं दुर्जरवीर्यमुल्बणं घोरांकमादाय शिशोर्ददावथ गाढं कराभ्यां भगवान्प्रपीड्य तत्प्रा
णैः समं रोषसमन्वितोपिबत् १० सा मुंच मुंचालमिति प्रभाषिणी निपीड्यमानाखिलजी
वमर्मणि विवृत्य नेत्रे चरणौ भुजौ मुहुः प्रस्विन्नगात्रा क्षिपती रुरोद ह ११ तस्याः स्वनेना
तिगभीररंहसा साद्रिर्मही द्यौश्च चचाल सग्रहा रसा दिशश्च प्रतिनेदिरे जनाः पेतुः क्षितौ वा
वनिपातशंकया १२ निशाचरीत्थं व्यथितस्तना व्यसुर्व्यादाय केशांश्चरणौ भुजावपि
प्रसार्य गोष्ठे निजरूपमास्थिता वज्राहतो वृत्र इवापतन्नृप १३ पतमानोपि तद्देहस्त्रि कृष्ण
गव्यूत्यंतरद्रुमान् चूर्णयामास राजेंद्र [illegible] महदासीत्तदद्भुतम् १४ ईषामा २५

त्रोग्रदंष्ट्रास्यं गिरिकंदरनासिकं गंडशैलस्तनं रौद्रं प्रकीर्णारुणमूर्द्धजं १५ अंधकूपग
भीराक्षं पुलिनारोहभीषणं बद्धसेतुभुजोर्वंघ्रि शून्यतोयह्रदोदरं १६ संतत्रसुः स्म तद्वीक्ष्य
गोपा गोप्यः कलेवरं पूर्वं तु तन्निःस्वनितभिन्नहृत्कर्णमस्तकाः १७ बालं च तस्या उरसि
क्रीडंतमकुतोभयं गोप्यस्तूर्णं समभ्येत्य जगृहुर्जातसंभ्रमाः १८ यशोदारोहिणीभ्यां
ताः समं बालस्य सर्वतः रक्षां विदधिरे सम्यग्गोपुच्छभ्रमणादिभिः १९ गोमूत्रेण स्नापयि
त्वा पुनर्गोरजसार्भकं रक्षां चक्रुश्च शकृता द्वादशांगेषु नामभिः २० गोप्यः संस्पृष्टसलि
ला अंगेषु करयोः पृथक् न्यस्यात्मन्यथ बालस्य बीजन्यासमकुर्वत २१ अव्यादजोंघ्रि
मणिमांस्तव जान्वथोरू यज्ञोच्युतः कटितटं जठरं हयास्यः हृत्केशवस्त्वदुर ईश इनस्तु कंठं
विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कं २२ चक्र्यग्रतः सहगदो हरिरस्तु पश्चात्त्वत्पार्श्वयोर्धनुरसी
मधुहाजनश्च कोणेषु शंख उरुगाय उपर्युपेंद्रस्तार्क्ष्यः क्षितौ हलधरः पुरुषः समंतात् २३

Indira Gandhi National
Centre for the Arts

भा॰द॰ इन्द्रियाणिहृषीकेशःप्राणान्नारायणोवतुः श्वेतद्वीपपतिश्चित्तंमनोयोगेश्वरोवतु २४ पूर्वी

१९. प्रस्निगर्भस्तुतेबुद्धिमात्मानंभगवान्परः क्रीडंतंपातुगोविंदःशयानंपातुमाधवः २५ व्रजं

तमव्याद्वैकुंठआसीनंत्वांश्रियःपति भुंजानंयज्ञभुक्पातुसर्वग्रहभयंकरः २६ डाकि

न्योयातुधानश्चकूष्मांडायेर्भकाग्रहाः भूतप्रेतपिशाचाश्चयक्षरक्षोविनायका २७ को

टरारेवतीज्येष्ठापूतनामातृकादयः उन्मादायेह्यपस्मारादेहप्राणेंद्रियद्रुहः २८ स्वप्न

दृष्टामहोत्पाताहृद्धबालग्रहाश्चये सर्वेनश्यंतुतेविष्णोर्नामग्रहणभीरवः २९ श्रीशुक

उवाच इतिप्रणयबद्धाभिर्गोपीभिःकृतरक्षणं पाययित्वास्तनंमातासन्न्यवेशयदात्मजं

३० तावन्नंदादयोगोपाःमथुरायाव्रजंगताः विलोक्यपूतनादेहंबभूवुरतिविस्मिता

३१ नूनंबतर्षिःसंजातोयोगेशोवासमासतः सएवदृष्टोह्युत्पातोयदाहानकदुंदुभिः ३२ क कृष्ण

लेवरंपरशुभिश्छित्वातत्तेव्रजौकसः दूरेक्षिप्त्वावयवशोन्यदहन्काष्ठवेष्टितं ३३ दह्यमान १९

नं २

स्यदेहस्यधूमश्चागुरुसौरभः उत्थितःकृष्णनिर्भुक्तसपद्याहतपाप्मनः ३४ पूतनालो

कबालघ्नीराक्षसीरुधिराशना जिघांशयापिहरयेस्तनंदत्वापसद्गतिं ३५ किंपुनःश्रद्ध

याभक्त्याकृष्णायपरमात्मने यच्छन्प्रियतमंकिंनुरक्तास्तन्मातरोयथा ३६ पद्भ्यांभक्त

हृदिस्थाभ्यांवंद्याभ्यांलोकवंदितैः अंगंयस्याःसमाक्रम्यभगवानपिबत्स्तनं ३७ यातुधा

न्यपिसास्वर्गमवापजननीगतिं कृष्णभुक्तस्तनक्षीराःकिमुगावोनुमातरः ३८ पयांसि

यासामपिबत्पुत्रस्नेहस्नुतान्यलं भगवान्देवकीपुत्रःकैवल्याद्यखिलार्थदः ३९ तासा

माविरतंकृष्णेकुर्वतीनांसुतेक्षणं नपुनःकल्पतेराजन्संसारोज्ञानसंभवः ४० कटधूम

स्यसौरभ्यमवघ्रायव्रजौकसः किमिदंकुतएवेतिवदंतोव्रजमाययुः ४१ तेतत्रवर्णि

तंगोपैःपूतनागमनादिकं श्रुत्वातन्निधनंस्वस्तिशिशोश्चासन्सुविस्मिताः ४२ नंदस्व

पुत्रमादायप्रोष्यागतउदारधीः मूर्ध्न्यवघ्रायपरमांमुदंलेभेकुरूद्वह ४३ यएतत्पूतना

Indira Gandhi National
Centre for the Arts

भा·द· मोक्षंकृष्णस्यार्भकमद्भुतं शृणुयात्श्रद्धयामर्त्योगोविंदेलभतेरतिं ४४ इतिश्रीभागवते पूर्वो·
१७ महापुराणेदशमस्कंधेपूतनामोक्षोनामषष्ठोध्यायः ६ राजोवाच येनयेनावतारेणभग
वान्हरिरीश्वरः करोतिकर्णरम्याणिमनोज्ञानिचनःप्रभो १ यच्छृण्वतोपैत्यरतिर्वितृष्णा
४ दि सत्त्वंचशुद्ध्यत्यचिरेणपुंसः भक्तिर्हरौतत्पुरुषेचसख्यंतदेवहारंवदमन्यसेचेत् २ अथान्य
दपिकृष्णस्यतोकाचरितमद्भुतं मानुषंलोकमासाद्यतज्जातिमनुरुंधतः ३ श्रीशुकउवा
च कदाचिदौत्थानिककौतुकाप्लवेजन्मर्क्षयोगेसमवेतयोषितां वादित्रगीतद्विजमं
त्रवाचकैश्चकारसूनोरभिषेचनंसती ४ नंदस्यपत्नीकृतमज्जनादिकंविप्रैःकृतस्वस्त्यय कं ५
नंसुपूजितैः अन्नाद्यवासःस्रगभीष्टधेनुभिःसंजातनिद्राक्षमशीशयच्छनैः ५ औत्था
निकौत्सुक्यमनामनस्विनीसमागतान्पूजयतीव्रजौकसः नैवाशृणोद्वैरुदितंसुतस्यसारु कृष्ण·
दन्स्तनार्थीचरणावुदक्षिपत् ६ अधःशयानस्यशिशोरनोल्पकंप्रवालमृद्वंघ्रिहतं १७

व्यवर्तत विध्वस्तनानारसकुप्यभाजनंव्यत्यस्तचक्राक्षविभिन्नकूबरं ७ दृष्ट्वायशोदाप्रमु
खाव्रजस्त्रियऔत्थानिकेकर्मणियाःसमागताः नंदादयश्चाद्भुतदर्शनाकुलाःकथंस्वयंवै
शाकटंविपर्यगात् ८ ऊचुरव्यवसितमतीन्गोपान्गोपीश्चबालकाः रुदतानेनपादेनक्षिप्त
मेतन्नसंशयः ९ नतेश्रद्दधिरेगोपाबालभाषितमित्युत अप्रमेयंबलंतस्यबालकस्यनतेवि
दुः १० रुदंतंसुतमादाययशोदाग्रहशंकिता कृतस्वस्त्ययनंविप्रैःसूक्तैःस्तनमपाययत् ११
पूर्ववत्स्थापितंगोपैर्बलिभिःसपरिच्छदं विप्राहुत्वार्चयांचक्रुर्दध्यक्षतकुशांबुभिः १२
येऽसूयानृतदंभेर्ष्याहिंसामानविवर्जिताः नतेषांसत्यशीलानामाशिषोविफलाःकृताः १३
इतिबालकमादायसामर्ग्यजुरुपाकृतैः जलैःपवित्रौषधिभिरभिषिच्यद्विजोत्तमैः १४ वा
चयित्वास्वस्त्ययनंनंदगोपःसमाहितः हुत्वाचाग्निंद्विजातिभ्यःप्रादादन्नंमहागुणं १५ गा
वःसर्वगुणोपेतावासःस्रग्रुक्ममालिनीः आत्मजाभ्युदयार्थायप्रादात्तेचान्वयुंजत १६

Indira Gandhi National
Centre for the Arts

भा॰द॰ विप्रामंत्रविदोयुक्तास्तैर्याःप्रोक्तास्तथाशिषः तानिष्फलाभविष्यंतिनकदाचिदितिस्फुटं १ पूर्वी
१८ ७ दे्कदारोहमारूढंलालयंतिसुतंसती गरिमाणंशिशोर्वोढुंनसेहेगिरिकूटवत् १८ भू
मौनिधायतंगोपीविस्मिताभारपीडिता महापुरुषमादध्यौजगतामासकर्मसु १९ दैत्यो
नाम्नातृणावर्तःकंसभृत्यप्रचोदितः चक्रवातस्वरूपेणजहारासीनमर्भकं २० गोकुलं
सर्वमावृण्वन्मुष्णंश्चक्षूंषिरेणुभिः ईरयन्सुमहाघोरशब्देनप्रदिशोदिशः २१ मुहूर्त
मभवद्गोष्टंरजसातमसावृतं सुतंयशोदानापश्यत्तस्मिन्यस्तवतीयतः २२ नापश्यत्
कश्चनात्मानंपरंचापिविमोहितः तृणावर्त्तनिसृष्टाभिःशर्कराभिरुपद्रुतः २३ इतिखर
पवनचक्रपांशुवर्षेसुतपदवीमबलाविलक्ष्यमाता अतिकरुणमनुस्मरंत्यशोचद्भुविप
तितामृतवत्सकायथागौ २४ रुदितमनुनिशम्यतत्रगोप्योभृशमनुतप्तधियोऽश्रुपूर्णमु मुख्यः
रुरुदुरनुपलभ्यनंदसूनुंपवनउपारतपांशुवर्षवेगे २५ तृणावर्त्तःशांतरयोवात्यारू १८

पा १

पधरोहरन् कृष्णंनभोगतोगंतुंनाशक्नोद्भूरिभारभृत् २६ तमश्मानंमन्यमानआत्मनो
गुरुमत्तया गलेगृहीतउत्स्रष्टुंनाशक्नोदद्भुतार्भकं २७ गलग्रहणनिश्चेष्टोदैत्योनिर्गत
लोचनः अव्यक्तरावोन्यपतत्सहबालोव्यसुर्व्रजे २८ तमंतरिक्षात्पतितंशिलायांविशी
र्णसर्वावयवंकरालं पुरंयथारुद्रशरेणविद्धंस्त्रियोरुदंत्योददृशुःसमेता २९ प्रादाय
मात्रेप्रतिहृत्यविस्मिताःकृष्णंचतस्योरसिलंबमानं तंस्वस्तिमंतंपुरुषादनीतंविहायसाम्
त्युमुखात्प्रमुक्तं ३० गोप्यश्चगोपाकिलनंदमुख्यालब्ध्वाशिषःप्रापुरतीवमोदं समेत्यचै
कत्रकृताशिषोमल्ला विचारयामासुरुपायमन्नतं ३१ अहोबतात्यद्भुतमेवरक्षसाबालोनिवृ ६४
त्तिंगमितोऽभ्यगात्पुनः हिंस्रःस्वपापेनविहिंसितःखलःसाधुःसमत्वेनभयाद्विमुच्यते ३२
किंनस्तपश्चीर्णमधोक्षजार्चनंपूर्त्तेष्टदत्तःसुतभूतसौहृदं यत्संपरेतःपुनरेवबालकोदिष्ट्या
स्वबंधून्प्रणयन्नुपस्थितः ३३ दृष्ट्वाद्भुतानिबहुशोनंदगोपोबृहद्वने वसुदेववचोभूयोमा

१८

Indira Gandhi National
Centre for the Arts

भा॰द॰ नयामासविस्मितः ३४ तृणावर्त्तागमेदृष्टगोरवाशंकनीमसं बोधमनद्रष्टयामासजंभ पूर्वी
१९ मालेमुखेजगत् ३५ एकदार्भकमादायस्वांकमारोप्यभामिनी प्रस्नुतपाययामा
सस्तनंस्नेहपरिस्नुता ३५ पीतप्रायस्यजननीसातस्यरुचिरस्मितं लालयंतिमुखंराज
न्जृंभतोददृशेइदं ३६ खंरोदसीज्योतिरनीकमाशाःसूर्येंदुवन्हिश्वसनांबुधींश्च
द्वीपान्नगांस्तत्दुहितॄर्वनानिभूतानियानिस्थिरजंगमानि ३७ सावीक्ष्यविश्वंसहसा
राजन्संजातवेपथुः संमील्यमृगशावाक्षीनेत्रेआसीत्सुविस्मिता ३८ इतिश्रीभागव
तेमहापुराणेदशमस्कंधेतृणावर्तमोक्षोनामसप्तमोध्यायः ७ श्रीशुकउवाच गर्गः
पुरोहितोराजन्यदूनांसुमहातपाः व्रजंजगामनंदस्यवसुदेवप्रचोदितः १ तंदृष्ट्वापरमः
प्रीतःप्रत्युत्थायकृतांजलिः आनर्चाधोक्षजधियाप्रणिपत्यपुरःसरं २ सूपविष्टंकृता
तिथ्यंगिरासूनृतयामुनिं नंदयित्वाब्रवीत्ब्रह्मन्पूर्णस्यकरवामकिं ३ महद्विचलनंनॄ १९

णांगृहीणांदीनचेतसां निःश्रेयसायभगवन्कल्पतेनान्यथाक्वचित् ४ ज्योतिषामयि
नंसाक्षाद्यत्तज्ज्ञानमतींद्रियं प्रणीतंभगवतायेनपुमान्वेदपरावरं ५ त्वंहिब्रह्मविदांश्रेष्ठ
ःसंस्कारान्कर्त्तुमर्हसि बालयोरुभयोर्नृणांजन्मनाब्राह्मणोगुरुः ६ गर्गउवाच यदूना
महमाचार्यःख्यातश्चभुविसर्वतः सुतंमयासंस्कृतंतेमन्यतेदेवकीसुतं ७ कंसःपापमतिः
सख्यंतववचानकदुंदुभेः देवक्याअष्टमोगर्भोनस्त्रीभवितुमर्हति ८ इतिसंचिंतयंश्रुत्वा
देवक्यादारिकावचः अपिहंतागताशंकस्तर्हितन्नोऽनयोभवेत् ९ नंदउवाच अल
क्षितोस्मिन्रहसिमामकैरपिगोव्रजे कुरुद्विजातिसंस्कारंस्वस्तिवाचनपूर्वकं १० श्री
शुकउवाच एवंसंप्रार्थितोविप्रःस्वचिकीर्षितमेवतत् चकारनामकरणंगूढोरहसि
बालयोः ११ गर्गउवाच अयंहिरोहिणीपुत्रोरमयन्सुहृदोगुणैः आख्यास्यतेरा
मइतिबलाधिक्याद्बलंविदुः १२ यदूनामपृथग्भावात्संकर्षणमुशंत्युतः आसन्व

Indira Gandhi National
Centre for the Arts

भा॰द॰ र्णास्त्रयोह्यस्यगृह्णतोनुयुगंतनूः शुक्लोरक्तस्तथापीतइदानींकृष्णतांगतः १३ प्रागयं पूर्वा॰
२० वसुदेवस्यक्वचिज्जातस्तवात्मजः वासुदेवइतिश्रीमानभिज्ञाःसंप्रचक्षते १४ बहू
निसंतिरूपाणिनामानिचसुतस्यते गुणकर्माणिरूपाणितान्यहंवेदनोजना १५ एषः
श्रेयआधास्यद्गोपगोकुलनंदनः अनेनसर्वदुर्गाणियूयमंजस्तरिष्यथ १६ पुरानेन
॰ए॰ व्रजपतेसाधवोदस्युपीडिता अराजकेरक्ष्यमाणाजिग्युदस्यून्समेधिताः १७ यएतस्मि
न्महाभागाःप्रीतिंकुर्वंतिमानवाः नारयोभिभवंत्येतान्विष्णुपक्षानिवासुराः १८ त
स्मान्नंदात्मजोयंतेनारायणसमोगुणैः श्रियाकीर्त्यानुभावेनगोपायस्वसमाहितः
१९ इत्यात्मानंसमादिश्यगर्गेचस्वगृहंगते नंदःप्रमुदितोमेनेआत्मानंपूर्णमाशिषां
२० कालेनव्रजताल्पेनगोकुलेरामकेशवौ जानुभ्यांसहपाणिभ्यांरिंगमाणौविजह्र कृष्ण॰
तुः २१ तावंघ्रियुग्म मनुकृष्यसरीसृपंतौघोषप्रघोषरुचिरंव्रजकर्दमेषु तन्ना २०

दहृष्टमनसावनुसृत्यलोकंमुग्धप्रभीतवदुपेयतुरंतिमात्रोः २२ तन्मातरौनिजसुतौ
घृणयास्नुवंत्यौपंकांगरागरुचिराउपगुह्यदोर्भ्यां दत्वास्तनंप्रपिबतोःस्ममुखंनिरी
क्ष्यमुग्धस्मिताल्पदशनंययतुप्रमोदं २३ यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजेत
दबलाःप्रगृहीतपुछैः वत्सैरितस्ततउभावपिकृष्यमाणौप्रेक्षंत्यउज्झितगृहाजहृ
६ सि षुर्हसंत्य २४ शृंग्यग्निदंष्ट्रजलद्विजकंटकेभ्यःक्रीडापरावतिचलौस्वसुतौनिषेद्धुं
गृह्यानिकर्तुमपियत्रनतज्जनन्यौशेकातआपतुरलंमनसोनवस्थां २५ कालेना
ल्पेनराजर्षेरामकृष्णश्चगोकुले अघृष्टजानुभिःपद्भिर्विचक्रमतुरंजसा २६ ततस्तु
भगवान्कृष्णोवयस्यैर्व्रजबालकैः सहरामोव्रजस्त्रीणांचिक्रीडेजनयन्मुदं २७ कृष्ण
स्यगोप्योरुचिरंवीक्ष्यकौमारचापलं शृण्वंत्याःकिलतन्मातुरितिहोचुःसमागता २८
वत्सान्मुंचन्क्वचिदसमयेक्रोशसंजातहासःस्तेयंस्वाद्वत्त्यथदधिपयःकल्पितैस्तेय

Indira Gandhi National
Centre for the Arts

भा॰द॰ योगैः मर्कान्भोक्ष्यन्विभजति स चेन्नात्ति भांडं भिनत्ति द्रव्यालाभे स गृहकुपितो यात्युपक्रोश्य पूर्वी·
२१ तोकान् २९ हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैश्छिद्रं ह्यंतर्निहितवयुनः शिक्यभांडे
षु तद्वित् ध्वांतागारे धृतमणिगणं स्वांगमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्र
चित्ता ३० एवं धार्ष्ट्यान्युशति कुरुते मेहनादीनि वास्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको
यथास्ते इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्था प्रहसितमुखी न ह्यु
पालब्धुमैच्छत् ३१ एकदा क्रीडमानास्ते रामाद्या गोपदारकाः कृष्णो मृदं भक्षितवा
निति मात्रे न्यवेदयन् ३३ सा गृहीत्वा करे कृष्णमुपालभ्य हितैषिणी यशोदा भयसंभ्रां
तप्रेक्षणाक्षमभाषत ३४ कस्मान्मृदमदांतात्मन्भवान्भक्षितवान्रहः वदंति तावका
ह्येते कुमारास्तेऽग्रजोप्ययं ३५ श्रीकृष्ण उवाच नाहं भक्षितवानंब सर्वे मिथ्याभि कृष्ण·
शंसिनः यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखं ३६ यद्येवं तर्हि व्यादेहीत्युक्तः स भग २१

---

वान्हरिः व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबालकः ३७ सा तत्र ददृशे विश्वं जगत्स्थास्नु च खं दि
शश्च साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नींदुतारकं ३८ ज्योतिश्चक्रं जलं तेजो नभस्वान्वियदे
व च वैकारिकाणींद्रियाणि मनो मात्रा गुणास्त्रयः ३९ एतद्विचित्रं सहजीवकालस्वभावक ल ३
र्माशयलिंगभेदं सूनोस्तनौ वीक्ष्य विदारितास्ये व्रजं सहात्मानमवाप शंकां ४० यशोदाउवा
च किं स्वप्न एतदुत देवमाया किं वा मदीयो बत बुद्धिमोहः अथो अमुष्यैव ममार्भकस्य यः
कश्चनौत्पत्तिक आत्मयोगः ४१ अथो यथावन्न वितर्कगोचरं चेतोमनःकर्मवचोभिरं
जसा यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणतास्मि तत्पदं ४२ अहं ममासौ पतिरेष
मे सुतो व्रजेश्वरस्याखिलवित्तपा सती गोप्यश्च गोपाः सहगोधनाश्च मे यन्माययेत्थं कुमतिः य
स मे गतिः ४४ इत्थं विदिततत्त्वायां गोपिकायां स ईश्वरः वैष्णवीं व्यतनोन्मायां पुत्र
स्नेहमयीं विभुः ४५ सद्यो नष्टस्मृतिर्गोपी सारोप्यारोहमात्मजं प्रवृद्धस्नेहकलिल

Indira Gandhi National
Centre for the Arts

भा॰द॰ हृद्यासीद्यथापुरा ४४ त्रय्याचोपनिषद्भिश्चसांख्ययोगैश्चसात्वतैः उपगीयमानमाहात्म्यं पूर्वा
२२ हरिंसामन्यतात्मजं ४५ राजोवाच नंदःकिमकरोद्ब्रह्मन्छ्रेयएवंमहोदयं यशोदाचम
हाभागापपौयस्याःस्तनंहरिः ४६ पितरौनान्वविंदेतांकृष्णोदारार्भकेहितम् गायंत्यद्यापि
कवयोयल्लोकशमलापहं ४७ श्रीशुकउवाच द्रोणोवसूनांप्रवरोधरयासहभार्यया
करिष्यमाणआदेशान्ब्रह्मणस्तमुवाचह ४८ जातयोर्नौमहादेवेभुविविश्वेश्वरेहरौ
भक्तिःस्यात्परमालोकेययांजोदुर्गतिंतरेत ५० अस्त्वित्युक्तःसभगवान्व्रजेद्रोणोमहाय
शाः जज्ञेनंदइतिख्यातोयशोदासाधराभवत ५१ ततोभक्तिर्भगवतिपुत्रीभूतेजनार्दने
दंपत्योर्नितरामासीद्गोपगोपीषुभारत ५२ कृष्णोब्रह्मणआदेशंसत्यंकर्तुंव्रजेविभुः
सहरामोवसंश्चक्रेतेषांप्रीतिंस्वलीलया ५३ इतिश्रीभागवतेमहापुराणेदशमस्कंधेवि कृष्ण॰
श्वरूपदर्शनेऽष्टमोध्यायः ८ श्रीशुकउवाच एकदागृहदासीषुयशोदानंदगेहिनी २२

कर्मांतरनियुक्तासुनिर्ममंथस्वयंदधि १ यानियानीहगीतानितद्बालचरितानिच दधि
निर्मंथनेकालेस्मरंतीतान्यगायत २ क्षौमंवासःपृथुकटितटेबिभ्रतीसूत्रनद्धंपुत्रस्ने
हस्नुतकुचयुगंजातकंपंचसुभ्रूः रज्ज्वाकर्षश्रमभुजचलत्कंकणौकुंडलेचखिन्नंवक्त्रंक
बरविगलन्मालतीनिर्ममंथ ३ तांस्तन्यकामआसाद्यमथ्नंतींजननींहरिः गृहीत्वाद
धिमंथानंन्यषेधत्प्रीतिमावह ४ तमंकमारूढमपाययत्स्तनंस्नेहस्नुतंसस्मितमीक्षतीमुखं
अतृप्तमुत्सृज्यजवेनसाययावुत्सिच्यमानेपयसित्वधिश्रिते ५ संजातकोपःस्फुरितारु
णाधरंसंदश्यदद्भिर्दधिमंथभाजनं भित्वामृषाश्रुर्दृषदश्मनारहोजघासहैयंगवमंतरंग
तः ६ उत्तार्यगोपीसुशृतंपयःपुनःप्रविश्यसंदृश्यचदध्यमत्रकं भग्नंविलोक्यस्वसुत
स्यकर्मतज्जहासतंचापिनतत्रपश्यती ७ उलूखलांघ्रेरुपरिव्यवस्थितंमर्कायकामंददं
तंशिचिस्थितं हैयंगवंचौर्यविशंकितेक्षणंनिरीक्ष्यपश्चात्सुतमागमच्छनैः ८ तामात्तय

Indira Gandhi National
Centre for the Arts

भा-द- ष्टिं प्रसमीक्ष्य सत्वरः स्ततोवरुह्यापससार भीतवत् गोप्यन्वधावन्नयमापयोगिनां क्षमंप्र पूर्वा-
२३ वेष्टुं तपसेरितंमनः ९ अन्वंचमानाजननीबृहच्चलच्छ्रोणीभराक्रांतगतिःसुमध्यमा जवे
नविस्रंसितकेशबंधनच्युतप्रसूनानुगतिः परामृशत् १० कृतागसंतंप्ररुदंतमक्षिणी क
षंतमंजन्मषिणीस्वपाणिना उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वाभिषयंत्यवागु
रत् ११ त्यक्त्वायष्टिंसुतंभीतं विज्ञायार्भकवत्सला इयेषकिलतंबद्धुं दाम्नातद्वीर्यकोवि
दा १२ नचांतर्नबहिर्यस्यनपूर्वंनापिचापरं पूर्वापरंबहिश्चांतर्जगतोयोजगच्चयः १३
तंमत्वात्मजमव्यक्तंमर्त्यलिंगमधोक्षजं गोपिकोलूखलेदाम्नाबबंधप्राकृतंयथा १४
तद्दामबध्यमानस्यस्वार्भकस्यकृतागसः द्व्यंगुलोनमभूत्तेनसंदधेन्यच्चगोपिका १५ य
दासीत्तदपिन्यूनं तेनान्यदपिसंदधे तदपिद्व्यंगुलंन्यूनंयद्यदादत्तबंधनं १६ एवंस्वगेह कृष्ण
दामानियच्छोदा संदधत्यपि गोपीनां सुस्मयंतीनां स्मयंतीविस्मिताभवत् १७ स्वमातुः २३

स्विन्नगात्राया विस्रस्तकबरस्रजः दृष्ट्वापरिश्रमं कृष्णः कृपयासीत्स्वबंधने ॥१८॥ एवंसं
दर्शिताह्यंगहरिणाभृत्यवश्यता ॥ स्ववशेनापिकृष्णेन यस्येदंसेश्वरंवशे ॥१९॥ नेमंविरिंचो
नभवो नश्रीरप्यंगसंश्रया ॥ प्रसादंलेभिरेगोपी यत्तत्प्रापविमुक्तिदात् ॥२०॥ नायंसुखापोभ
गवान्देहिनांगोपिकासुतः ॥ ज्ञानिनांचात्मभूतानां यथाभक्तिमतामिह ॥२१॥ कृष्णस्तुगृ
हकृत्येषुव्यग्रायांमातरिप्रभो ॥ अद्राक्षीदर्जुनौ पूर्वंगुह्यकौ धनदात्मजौ ॥२२॥ पुरानारद
शापेनवृक्षतांप्रापितौमदात् ॥ नलकूबरमणिग्रीवावितिख्यातौश्रियान्वितौ ॥२३॥ इति
श्रीभागवतेमहापुराणेदशमस्कंधेगोपीप्रसादोनाम नवमोध्यायः ॥९॥ राजोवाच ॥ कथ्य
तांभगवन्नेतत्तयोःशापस्यकारणं ॥ यत्तद्विगर्हितंकर्मयेनदेवर्षेस्तमः ॥१॥ श्रीशुकउवाच
रुद्रस्यानुचरौभूत्वासुदृप्तौधनदात्मजौ ॥ कैलासोपवनेरम्येमंदाकिन्यांमदोत्कटौ ॥२॥ वारु
णींमदिरांपीत्वामदाघूर्णितलोचनौ ॥ स्त्रीजनैरनुगायद्भिश्चेरतुःपुष्पितेवने ॥३॥ अंतःप्रविश्यगं

Indira Gandhi National
Centre for the Arts

भा०द गायामंभोजवनराजिना चिक्रीडतुर्युवतिभिर्गजाविवकरेणुभिः ४ यदृच्छयापिदेवर्षि पूर्वा
२४ र्भगवांस्तत्र कौरव अपश्यन्नारदोदेवौक्षीवाणौसमबुध्यत ५ तंदृष्ट्वाव्रीडितादेव्यो
विवस्त्रांशापशंकिताः वासांसिपर्यधुःशीघ्रंविवस्त्रौनैवगुह्यकौ ६ तौदृष्ट्वामदिराम
त्तौश्रीमदांधौसुरात्मजौ यतोरनुग्रहार्थायशापंदास्यन्निदंजगौ ७ श्रीनारदउवाच नह्य
न्योजुषतेजोष्यान बुद्धिभ्रंशोरजोगुण श्रीमदादभिजात्यादियत्रस्त्रीद्यूतमासवः ८ ह
न्यंतेपशवोयत्र निर्दयैरजितात्मभिः मन्यमानैरिदंदेहमजरामृत्युनश्वरम् ९ देवसंज्ञि
तमप्यंतेकृमिविड्भस्मसंज्ञितं भूतध्रुक्तत्कृते स्वार्थंकिंवेदनिरयोयतः १० दे
हःकिमन्नदातुः स्वंनिषेक्तुर्मातुरेववा मातुःपितुर्वाबलिनःक्रेतुरग्नेःशुनोपिवा ११
एवंसाधारणंदेहमव्यक्तप्रभवाप्ययं कोविद्वानात्मसात्कृत्वाहंतिजंतून्ऋतेसतः १२ अ कृष्ण
सतःश्रीमदांधस्यदारिद्र्यंपरमांजनं आत्मौपम्येनभूतानिदरिद्रःपरमीक्षते १३ यथा २५

कंटकविद्धांगोजंतोर्नेच्छतितांव्यथां जीवसाम्यंगतोलिंगैर्नतथाविद्धकंटकः १४ द
रिद्रोनिरहंस्तंभोमुक्तःसर्वमदैरिह कृच्छ्रंयदृच्छयाप्नोतितद्धितस्यपरंतपः १५ नित्यं
क्षुत्क्षामदेहस्यदरिद्रस्यान्नकांक्षिणः इंद्रियाण्यनुशुष्यंतिहिंसापिविनिवर्तते १६
दरिद्रेष्वेवयुंजंतेसाधवःसमदर्शिनः सद्भिःक्षिणोतितंतर्षंततआराद्विशुध्यति १७
साधूनांसमचित्तानामुकुंदचरणैषिणां उपेक्ष्यैःकिंधनस्तंभैरसद्भिरसदाश्रयैः १८
तदहंमत्तयोर्माध्व्या वारुण्याश्रीमदांधयोः तमोमदंहरिष्यामिस्त्रैणयोरजितात्मनो १
९ यदिमौलोकपालस्यपुत्रौभूत्वातमःप्लुतौ नविवाससमात्मानंविजानीतःसुदुर्मदौ २
अतोर्हतःस्थावरतांस्यातांनैवयथापुनः स्मृतिःस्यान्मत्प्रसादेनतत्रापिमदनुग्रहात् २
१ वासुदेवस्यसान्निध्यंलब्ध्वादिव्यशरच्छते वृत्तेस्वर्लोकतांभूयोलब्धभक्तिभविष्यथ
२२ श्रीशुकउवाच एवमुक्त्वासदेवर्षिर्गतोनारायणाश्रमं नलकूबरमणिग्रीवावासतु

भा॰द॰ र्यमलार्जुनौ २३ ऋषेर्भागवतमुख्यस्य सत्यं कर्तुं वचो हरिः जगाम शनकैस्तत्र यत्रा। पूर्वा॰
२५ स्तां यमलार्जुनौ २४ देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ तत्तथा साधयिष्यामि य
द्गीतं तन्महात्मना २५ इत्यंतरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ आत्मनिर्वेशमात्रेण ति
र्यग्गतमुलूखलं २६ बालेन निष्कर्षयतान्वगुलूखलं तत् दामोदरेण तरसोत्कलितांघ्रि
बंधौ निपेततुः परमविक्रमितातिवेपस्कंधप्रवालविटपौ कृतचंडशब्दौ २७ तत्र श्रि
या परमया ककुभः स्फुरंतौ सिद्धावुपेत्य कुजयोरिव जातवेदाः कृष्णं प्रणम्य शिरसाखि
ललोकनाथं बद्धांजली विरजसाविदमूचतुस्मः २८ नलकूवर उवाच कृष्ण कृष्ण म
हायोगिंस्त्वमाद्यः पुरुषः परः व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः २९ त्वमेकः स
र्वभूतानां देहस्वात्मेंद्रियेश्वरः त्वमेव कालो भगवान्विष्णुरव्यय ईश्वरः ३० त्वं महान्प्र कृष्ण॰
कृतिः सूक्ष्मा रजःसत्वतमोमयी त्वमेव पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवित् ३१ गृह्यमा २५

णैस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः को न्विहार्हति विज्ञातुं प्राक्सिद्धं गुणसंवृतः ३२
तस्मै तुभ्यं भगवते वासुदेवाय वेधसे आत्मद्योतगुणैश्छन्नमहिम्ने ब्रह्मणे नमः ३३ य
स्यावतारा ज्ञायंते शरीरेष्वशरीरिणः तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः ३४ स भ
वान्सर्वलोकस्य भवाय विभवाय च अवतीर्णोंऽशभागेन सांप्रतं पतिराशिषां ३५ नमः
परमकल्याण नमस्ते विश्वमंगल वासुदेवाय शांताय यदूनां पतये नमः ३६ अनुजा
नीहि नौ भूमंस्तवानुचरकिंकरौ दर्शनं नौ भगवतः ऋषेरासीदनुग्रहात् ३७ वाणी
गुणानुकथने श्रवणौ कथायां हस्तौ च कर्मसु मनस्तव पादयोर्नः स्मृत्यां शिरस्तव निवा
सजगत्प्रणामे दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनां ३८ श्रीशुक उवाच इत्थं संकीर्तित
स्ताभ्यां भगवान्गोकुलेश्वरः दाम्ना चोलूखले बद्धः प्रहसन्नाह गुह्यकौ ३९ श्रीभगवा
नुवाच ज्ञातं मम पुरैवैतदृषिणा करुणात्मना यच्छ्रीमदांधयोर्वाग्भिर्विभ्रंशोऽनुग्रहः

Indira Gandhi National
Centre for the Arts

भा-द- कृतः ४० साधूनांसमचित्तानांसुतरांमत्कृतात्मनां दर्शनान्नोभवेद्बंधःपुंसाक्ष्णोःसवितुर्य पूर्वा-
२६ था तद्गच्छतंमत्परमौनलकूवरसादनं संजातोमयिभावोवामीप्सितःपरमोभवः ४२
श्रीशुकउवाच इत्युक्तौतौपरिक्रम्यप्रणम्यचपुनःपुनः बद्धोलूखलमामंत्र्यजग्मतुर्दि
शमुत्तरां ४३ इतिश्रीभागवतेमहापुराणेदशमस्कंधेनलकूवरमणिग्रीवमोक्षोनामद
शमोध्यायः १० श्रीशुकउवाच गोपानंदादयःश्रुत्वाद्रुमयोःपततोरवं तत्राजग्मुःकु
रुश्रेष्ठनिर्घातभयशंकिता १ भूम्यांनिपतितौतत्रददृशुर्यमलार्जुनौ बभ्रमुस्तद
विज्ञायलक्ष्यंपतनकारणं २ उलूखलंविकर्षंतंदाम्नाबद्धंचबालकं कस्येदंकुत
आश्चर्यमुत्पातभयकातरा ३ बालाऊचुरनेनेतितिर्यग्गतमुलूखलं विकर्षता
मध्यगेनपुरुषावप्यचक्ष्महि ४ नतेतदुक्तंजगृहुर्नघटेतेतितस्यतत् बालस्योत्कस्य क्ष्मा-
पारनंतचोकोचित्संदिग्धचेतसः ५ उलूखलंविकर्षंतंदाम्नाबद्धंस्वमात्मजं विलो २९

क्यनंदप्रहसद्वदनोविमुमोचह ६ गोपीभिःस्तोभितोनृत्यात्भगवान्बालवत्क्व
चित् उद्गायतिक्वचिन्मुग्धस्तद्वशोदारुयंत्रवत् ७ बिभर्तिक्वचिदाज्ञप्तःपावकोन्मान
पादुकं बाहुक्षेपंचकुरुतेस्वानांचप्रीतिमावहन् ८ दर्शयंस्तद्विदांलोकेआत्मनोभृ
त्यवश्यतां ब्रह्मस्योचाहवैहर्षंभगवान्बालचेष्टितैः ९ सत्तिरिगत्तकृष्णभयार्जनम
थाकृयत् जन्मर्क्षमद्यभवतोविप्रेभ्योदेहिगाःशुचिः १० वस्त्रपदंस्यचपर्यंस्तेमात्तभ
श्चान्स्वलंकृतान् त्वंचस्नातकृताहारोविहरस्वस्वलंकृत ११ मोपेयातांयदाहूतो
क्रीडासंगेनपुत्रकौ यशोदांप्रेषयामासरोहिणीपुत्रवत्सला १२ इत्थंयशोदातमशेष
शेखरंमत्वासुतंस्नेहनिबद्धधीर्नृपः हस्तेगृहीत्वासहराममच्युतंनीत्वास्ववाटंकृतवत्य
थोदयं १३ क्रीडंतंसासुतंबालैरतिवेलंसहाग्रजं यशोदाजोहवीत्कृष्णंपुत्रस्नेहस्नुत
स्तनी १४ कृष्णकृष्णारविंदाक्षतातएहिस्तनंपिब अलंविहारैःक्षुत्क्षांतःक्लांतभवान्भो

Indira Gandhi National
Centre for the Arts

भा·द· कुमर्हसि १५ हेरामागच्छताताशुसानुजःकुलनंदन प्रातरेवकृताहारक्रीडाश्रांतोसि पूर्वा·
२७ पुत्रकः १६ प्रतीक्षतेत्वांदाशार्हभोक्ष्यमाणोव्रजाधिपः एह्यावयोःप्रियंदेहिस्वगृहा
न्यात्तुबालकः १७ श्रीशुकउवाच गोपवृद्धामहोत्पातानुनुभूयबृहद्वने नंदादयःस
मागम्यव्रजकार्यममंत्रयत् १८ तत्रोपनंदनामाहगोपोज्ञानवयोधिकः देशकाला
लार्थतत्त्वज्ञःप्रियकृद्रामकृष्णयोः १९ उत्थातव्यमितोस्माभिर्गोकुलस्यहितैषिभिः
आयांत्यत्रमहोत्पाताबालानांनाशहेतवः २० मुक्तःकथंचिद्राक्षस्याबालघ्न्याबा
लकोह्यसौ हरेरनुग्रहान्नूनंनभश्चोपरिनापतत् २१ चक्रवातेननीतोयंदैत्येन
विपदंवियत् शिलायांपतितस्तत्रपरित्रातःसुरेश्वरैः २२ यन्नम्रियेतद्रुमयोरंत
रंप्राप्यबालकः असावन्यतमोवापितदप्यच्युतरक्षणं २३ यावदौत्पातिकोऽरि ष्ट·
ष्टोव्रजंनाभिभवेदितः तावद्बालानुपादाययास्यामोन्यत्रसानुगाः २४ वनंवृंदावनं २७

---

नामपशव्यंनवकाननं गोपगोपीगवांसेव्यंपुण्याद्रितृणवीरुधं २५ तत्तत्राद्यैववया
स्यामःशकटान्युक्तमाचिरं गोधनान्यग्रतोयांतुभवतांयदिरोचते २६ तच्छ्रुत्वैकधियो
गोपाःसाधुसाध्वितिवादिनः व्रजान्स्वान्स्वान्समायुज्यययूरूढपरिच्छदा २७ वृद्धान्बाला
न्स्त्रियोराजन्सर्वोपकरणानिच अनस्वारोप्यगोपालायत्ताआत्तशरासनाः २८ गो
धनानिपुरस्कृत्यशृंगाण्यापूर्यसर्वतः तूर्यघोषेणमहताययुःसहपुरोहिताः २९ गोप्यो
रूढरथानूत्नःकुचकुंकुमकांतयः कृष्णलीलाजगुःप्रीतानिष्ककंठ्यःसुवाससः ३० त
थायशोदारोहिण्यावेकंशकटमास्थिते रेजतुःकृष्णरामाभ्यांतत्कथाश्रवणोत्सुके ३१
वृंदावनंसंप्रविश्यसर्वकालसुखावहं तत्रचक्रुर्व्रजावासंशकटैरर्धचंद्रवत् ३२ वृंदा
वनंगोवर्द्धनंयमुनापुलिनानिच वीक्ष्यासीदुत्तमाप्रीतीराममाधवयोर्नृप ३३ एवंव्रजो
कसांप्रीतियच्छंतौबालचेष्टितैः कलवाक्यैःस्वकालेनवत्सपालौबभूवतु ३४ अविदू

Indira Gandhi National
Centre for the Arts

भा॰द॰ रेव्रजभुव सहगोपालदारकै चारयामासतुर्वत्सान् नानाक्रीडापरिच्छदौ ३५ क्वचिद्वाद पूर्वा॰
२८ यतो वेणुं क्षेपणैः क्षिपतः क्वचित् क्वचित्पादैः किंकिणीभिः क्वचित्कृत्रिमगोवृषैः ३
६ वृषायमाणौ नर्द्दंतौ युयुधाते परस्परं अनुकृत्य रुतैर्जंतूंश्चेरतुः प्राकृतौ यथा ३७ क
४१ दाचिद्यमुनातीरे वत्सांचारयतोः स्वकैः वयस्यैः कृष्णबलयोर्जिघांसुर्दैत्य आगमत् ३८ तं व
त्सरूपिणं वीक्ष्य वत्सयूथगतं हरिः दर्शयन् बलदेवाय शनैर्मुग्ध इवासदन् ३९ गृहीत्वा
परपादाभ्यां सहलांगूलमच्युतः भ्रामयित्वा कपित्थाग्रे प्राहिणोद्गतजीवितं ४० स कपि
त्थैर्महाकायः पात्यमानैः पपात ह तं वीक्ष्य विस्मिता बालाः शशंसुः साधुसाध्विति ४१ दे
वाश्च परिसंतुष्टाः बभूवुः पुष्पवर्षिणः तौ वत्सपालकौ भूत्वा सर्वलोकैकपालकौ ४२ स
प्रातराशौ गोवत्सांश्चारयंतौ विचेरतुः स्वं स्वं वत्सकुलं सर्वे पाययिष्यंत एकदा ४३ गत्वा कृष्ण॰
जलाशयाभ्यासे पाययित्वा पपुर्जलं ते तत्र ददृशुर्बाला महासत्वमवस्थितं ४४ तत्रसुवज्र २८

का १

निर्भिन्नं गिरेः शृंगमिव च्युतं स वै बको नाम महानसुरो बकरूपधृक् ४५ आगत्य सहसा कृ
ष्णं तीक्ष्णतुंडोऽग्रसद्बली कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः बभूवुरिंद्रियाणीव
विना प्राणं विचेतसः ४६ तं तालुमूलं प्रदहंतमग्निवत् गोपालसूनुं पितरं जगद्गुरोः बकु
द्द सद्योऽतिरुषाक्षतं बकः तुंडेन हंतुं पुनरभ्यपद्यत ४७ तमापतंतं स निगृह्य तुंडयोर्दोर्भ्यां
बकं कंससखं सतां पतिः पश्यत्सु बालेषु ददार लीलया मुदावहो वीरणवद्दिवौकसां
४८ तदा बकारिं सुरलोकवासिनः समाकिरन्नंदनमालिकादिभिः समीडिरे चानकशं
खसंस्तवैस्तद्वीक्ष्य गोपालसुता विसिस्मिरे ४९ मुक्तं बकास्यादुपलभ्य दारका मादाय
प्राणमिवेंद्रियो गणः स्थानागतं तं परिरभ्य निर्वृताः प्रणीय वत्सान्व्रजमेत्य तज्जगुः ५०
श्रुत्वा तद्विस्मिता गोपा गोप्यश्चापि प्रियादृताः प्रेत्यागतमिवोत्सुक्यादैक्षंत तृषितेक्षणाः
: अहो वतास्य बालस्य बहवो मृत्यवोऽभवन् अप्यासीद्विप्रियं तेषां कृतं पूर्वं यतो भय

Indira Gandhi National
Centre for the Arts

भा॰द ५२ अथाप्यभिभवंत्येनं नैवं ते घोरदर्शनाः जिघांसयैनमासाद्य नश्यंत्यग्नौ पतंगवत् ५ पूर्वा·
२९ ३ अहो ब्रह्मविदां वाचो नासत्याः संति कर्हिचित् गर्गो यदाह भगवानन्वभावि तथैव तत्
५४ इति नंदादयो गोपाः कृष्णरामकथां मुदा कुर्वंतो रममाणाश्च नाविंदन् भववेदनां ५
५ एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादिभिः ५
६ इति श्रीभागवते महापुराणे दशमस्कंधे वत्सबकवधो नाम एकादशोऽध्यायः ११ श्री
शुक उवाच क्वचिद्वनाशाय मनो दधद्व्रजात् प्रातः समुत्थाय वयस्यवत्सपान् प्रबोधय
न् शृंगरवेण चारुणा विनिर्गतो वत्सपुरःसरो हरिः १ तेनैव साकं पृथुकाः सहस्रशः स्नि
ग्धाः सुशिग्वेत्रविषाणवेणवः स्वकान् सहस्रोपरिसंख्ययान्वितान् वत्सान् पुरस्कृत्य वि कृष्ण·
निर्ययुर्मुदा २ कृष्णवत्सैरसंख्यातैर्यूथीकृत्य स्ववत्सकान् चारयंतोऽर्भलीलाभिर्वि
जह्रुस्तत्र तत्र ह ३ सुश्मंतोन्योन्यशिक्यादीन् ज्ञातानाराच्च चिक्षिपुः तत्रत्याश्च पुनर्दूरा २९
फलप्रवालस्तवकसुमनःपिच्छधातुभिः काचगुंजामणिस्वर्णभूषिता अप्यभूषयन् ४ २

द्धसंतश्च पुनर्ददुः ५ यदि दूरं गतः कृष्णो वनशोभेक्षणाय तं अहं पूर्वमहं पूर्वमिति संस्पृश्य
रेमिरे ६ केचिद्वेणून् वादयंतो ध्मांतः शृंगाणि केचन केचिद्भृंगैः प्रगायंतः कूजंतः कोकिलैः
परे ७ विच्छायाभिः प्रधावंतो गच्छंतः साधुहंसकैः बकैरुपविशंतश्च नृत्यंतश्च कलापि
भिः ८ विकर्षंतः कीशबालानारोहंतश्च तैर्द्रुमान् विकुर्वंतश्च तैः साकं प्लवंतश्च पला
शिषु ९ साकं भेकैर्विलंघंतः सरित्प्रस्रवसंप्लुताः विहसंतः प्रतिच्छायाः शपंतश्च प्रतिस्वना
न् १० इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन मायाश्रितानां नरदारकेण साकं
विजह्रुः कृतपुण्यपुंजाः ११ यत्पादपांशुर्बहुजन्मकृच्छ्रैर्धृतात्मभिर्योगिभिरप्यलभ्यः स एव मो ४
यद्दृग्विषयः स्वयं स्थितः किं वर्ण्यते दिष्टमहो व्रजौकसां १२ अथाघनामाभ्यपतन्महासुर
स्तेषां सुखक्रीडनवीक्षणाक्षमः नित्यं यदंतर्निजजीवितेप्सुभिः पीतामृतैरप्यमरैः प्रतीक्ष्यते
१३ दृष्ट्वार्भकान् कृष्णमुखानघासुरः कंसानुशिष्टः स बकीबकानुजः अयं तु मे सोदरनाश

Indira Gandhi National
Centre for the Arts

भा॰द॰ कृन्तयोर्द्वयोर्ममैनं सबलं हरिष्ये १४ एतौ यदा मत्सुहृदोस्तिलापः कृतास्तदा नष्टसमा व्रजौ पूर्वा
३० कसः प्राणे गते वर्ष्मसु का नु चिंता प्रजासवः प्राणभृतो हि ये ते १५ इति व्यवस्याजगरं बृहद्व
पुः स योजनायाममहाद्रिपीवरं धृत्वाद्भुतं व्यात्तगुहाननं तदा पथि व्यशेत ग्रसनाशया ख
लः १६ धराधरोष्ठो जलदोत्तरोष्ठो दर्याननांतो गिरिशृंगदंष्ट्रः ध्वांतांतरास्यो वितताध्वजि
ह्वः परुषानिलश्वासदवेक्षणोष्मः १७ दृष्ट्वा तं तादृशं सर्वे मत्वा वृंदावनश्रियं व्यात्ताजगरतुं
डेन ह्युत्प्रेक्षंते स्म लीलया १८ अहो मित्राणि गदत सत्वकूटं पुरः स्थितं अस्मत्संग्रसनव्या
त्तव्यालतुंडायते न वा १९ सत्यमर्ककरारक्तमुत्तराहनुवद्घनं अधराहनुवद्रोधस्तत्प्रति
च्छाययारुणं २० प्रतिस्पर्द्धेते सृक्किभ्यां सव्यासव्ये नगोदरे तुंगशृंगालयोऽप्येतास्तद्दंष्ट्रा
भिश्च पश्यत २१ आस्तृतायाममार्गोयं रसनां प्रतिगर्जति एषामंतर्गतं ध्वांतमेतद कृष्ण
प्यंतराननं २२ दावोष्मखरवातोयं श्वासवद्भाति पश्यत तद्दग्धसत्वदुर्गंधोऽप्यंतरामि ३०

श्री

षगंधवत् २३ अस्मान् किमत्र ग्रसिता निविष्टानयं तथा चेद्बकवद्विनंक्ष्यति क्षणादनेनेति
बकार्युशन्मुखं वीक्ष्योद्धसंतः करताडनैर्ययुः २४ इत्थं मिथोतथ्यमतज्ज्ञभाषितं श्रुत्वा विचिं
त्येत्यमृषा मृषायते रक्षो विदित्वाखिलभूतहृत्स्थितः स्वानां निरोद्धुं भगवान्मनो दधे
२५ तावत्प्रविष्टास्त्वसुरोदरांतरं परं न गीर्णाः शिशवः सवत्सकाः प्रतीक्षमाणेन बकारिवे
शनं [illegible] हतःस्वकांतःस्मरणेन रक्षसा २६ तान्वीक्ष्य कृष्णः सक
लाभयप्रदो ह्यनन्यनाथान्स्वकरादवच्युतान् दीनांश्च मृत्योर्जठराग्निघासान् घृणार्दितो
दिष्टकृतेन विस्मितः २७ कृत्यं किमत्रास्य खलस्य जीवनं न वा अमीषां च सतां विहिंस
नं द्वयं कथं स्यादिति संविचिंत्य तत् ज्ञात्वाविशत्तुंडमशेषदृग्घरिः २८ तदा घनच्छदा दे
वा भयाद्धाहेति चुक्रुशुः जहृषुर्ये च कंसाद्याः कौणपास्त्वघबांधवाः २९ तच्छ्रुत्वा भग
वान् कृष्णस्त्वव्ययः सार्भवत्सकां चूर्णीचिकीर्षोरात्मानं तरसा ववृधे गले ३० ततोति

Indira Gandhi National
Centre for the Arts

भा०द० कायस्थनिरुद्धमार्गिणो ह्युद्गीर्णदृष्टेर्भ्रमतस्त्वितस्ततः पूर्णोन्तरंगे पवनो निरुद्धो मूर्द्धन् पूर्वी-
३१ विनिःपाट्य विनिर्गतो बहिः ३१ तेनैव सर्वेषु विनिर्गतेषु प्राणेषु वत्सान् सुहृदः परेता
न् दृष्ट्या स्वयोत्थाप्य तदन्वितः पुनर्वक्त्रान्मुकुंदो भगवान् विनिर्ययौ ३२ पीनाहिभोगो
त्थितमद्भुतं महज्ज्योतिः स्वधाम्ना ज्वलयद्दिशो दश प्रतीक्ष्य खेवस्थितमीशनिर्गमं वि
वेश तस्मिन्मिषतां दिवौकसां ३३ ततोतिहृष्टाः स्वकृतो कृतार्हणं पुष्पैः सुरा अप्सरसश्च
नर्त्तनैः गीतैः सुगा वाद्यधराश्च वाद्यकैः स्तवैश्च विप्रा जयनिस्वनैर्गणाः ३४ तदद्भुतस्तोत्र
सुवाद्यगीतिकाजयादिनैकोत्सवमंगलस्वनान् श्रुत्वा स्वधाम्नोन्त्यज आगतो चिरात्
दृष्ट्वा महीशस्य जगाम विस्मयं ३५ राजन्नाजगरं चर्म शुष्कं वृंदावनेद्भुतं व्रजौकसां व
हुतिथं बभूवाक्रीडगह्वरं ३६ एतत्कौमारजं कर्म हरेरात्माहिमोक्षं गोपाः पौगंडके वा कृष्ण-
स्य दृष्ट्वोचुर्विस्मिता व्रजे ३७ नैतद्विचित्रं मनुजार्भमायिनः परावराणां परमस्य वेधसः ३१

न१ व२

अघोपि यत्स्पर्शनधौतपातकः प्रापात्मसाम्यं त्वसतां सुदुर्लभं ३८ सकृद्यदंगप्रतिमांतरा
हिता मनोमयी भागवतीं ददौ गतिं स एव नित्यात्मसुखानुभूत्या व्युदस्तमायः परमो गाकिं पुनः
३९ सूत उवाच इत्थं द्विजा यादवदेवदत्तः श्रुत्वा सुरातुश्चरितं विचित्रं पप्रच्छ भूयोपि तदेव पु वि३
ण्यं वैयासकिं यन्निगृहीतचेताः ४० राजोवाच ब्रह्मन्कालांतरकृतं तत्कालीनं कथं भवेत्
यत्कौमारे हरिकृतं जगुः पौगंडकेर्भका ४१ तद्ब्रूहि मे महायोगिन् परं कौतूहलं गुरो नूनमे
तद्धरेरेव माया भवति नान्यथा ४२ वयं धन्यतमा लोके गुरोपि क्षत्रबंधवः पत्पिबामो मुहु
स्त्वत्तः पुण्यं कृष्णकथामृतं ४३ सूत उवाच इत्थं स्म पृष्टः स तु बादरायणिस्तत्स्मारिता
नंतहृताखिलेंद्रियः कृच्छ्रात्पुनर्लब्धबहिर्दृशिः शनैः प्रत्याह तं भागवतोत्तमोत्तम ४४ इति
श्रीभागवते महापुराणे दशमस्कंधे अघासुरवधो नाम द्वादशोध्यायः १२ श्रीशुक उवाच सा
धु पृष्टं महाभाग त्वया भागवतोत्तमः यन्नूतनयसीशस्य शृण्वन्नपि कथां मुहुः १ सतामयं।

Indira Gandhi National
Centre for the Arts

भा·द· सारभृतांनिसर्गोयदर्थवाणीश्रुतिचेतसामपि प्रतिक्षणंनव्यवदच्युतस्ययत्स्त्रियोवि पूर्वो·
३२ टानामिवसाधुवार्त्ता २ शृणुष्वावहितोराजन्नपिगुह्यंवदामिते ब्रूयुःस्निग्धस्यशिष्य
३ वो स्यगुरवोगुह्यमप्युत ३ तथाऽघवदनान्मृत्योरक्षित्वावत्सपालकान् सरित्पुलिनमानीय
भगवानिदमब्रवीत् ४ अहोतिरम्यंपुलिनंवयस्याःस्वकेलिसंपन्मृदुलाच्छबालकं स्फु
टत्सरोगंधहृतालिपत्रिकध्वनिप्रतिध्वानलसद्द्रुमाकुलं ५ अत्रभोक्तव्यमस्माभिर्दि
वारूढंक्षुधार्दिताः वत्साःसमीपेपःपीत्वाचरन्तुशनकैःस्तृणं ६ तथेतिपाययित्वा
८ ल र्भावत्सानारुध्यशाद्वले मुक्त्वाशिक्यानिबुभुजुःसमंभगवतामुदा ७ कृष्णस्यविष्वक्
पुरुराजिमंडलैरभ्याननाःफुल्लदृशोव्रजार्भकाः सहोपविष्टाविपिनेविरेजुश्छदायथां
भोरुहकर्णिकायाः ८ केचित्पुष्पैर्दलैःकेचित्पल्लवैरंकुरैःफलैः शिग्भिस्त्वग्भिर्दृष कृष्ण·
द्भिश्चबुभुजुःकृतभाजनाः ९ सर्वेमिथोदर्शयंतःस्वस्वभोज्यरुचिंपृथक् हसंतोहास ३२

यंतश्चाभ्यवजह्रुःसहेश्वराः १० बिभ्रद्वेणुंजठरपटयोःशृंगवेत्रेचकक्षेवामेपाणौमसृ
णकवलंतत्फलान्यंगुलीषु तिष्ठन्मध्येसुपरिसुहृदोहासयन्नर्मभिःस्वैःस्वर्गेलोकेमिष
तिबुभुजेयज्ञभुक्बालकेलिः ११ भारतैवंवत्सपेषुभुंजानेष्वच्युतात्मसु वत्सास्त्वंत
र्वनेदूरंविविशुःस्तृणलोभिताः १२ तान्दृष्ट्वाभयसंत्रस्तानूचेकृष्णोस्यभीभयं मित्रा।
ण्याशान्माविरमतेहानेष्येवत्सकानहं १३ इत्युक्त्वाद्रिदरीकुंजगह्वरेष्वात्मवत्सकान् वि
चिन्वन्भगवान्कृष्णःसपाणिकवलोययौ १४ श्रीशुकउवाच अंभोजन्मजनिस्तदं
तरगतोमायार्भकस्येशितुर्द्रष्टुंमंजुमहित्वमन्यदपितत्वत्सानितोवत्सपान् नीत्वा
न्यत्रकुरूद्वहांतरदधात्खेवस्थितोयःपुरा दृष्ट्वाघासुरमोक्षणंप्रभवतःप्राप्तःपरंवि।
स्मयं १५ ततोवत्सानदृष्ट्वैत्यपुलिनेपिचवत्सपान् उभावपिवनेकृष्णोविचिकायसमं
ततः १६ क्वाप्यदृष्ट्वांतर्विपिनेवत्सान्पालांश्चविश्ववित् सर्वंविधिकृतंकृष्णःसह

Indira Gandhi National
Centre for the Arts

भा·द· ग्राचजगामह १८ ततःकृष्णोमुदंकर्तुंतन्मातृणांचकस्यच उभयायितमात्मानं पूर्वी·
३३ चक्रेविश्वकृदीश्वरः १९ यावद्वत्सपवत्सकाल्पकवपुर्यावत्कराङ्घ्र्यादिकं यावद्यष्टि
विषाणवेणुदलशिग्यावद्विभूषांबरं यावच्छीलगुणाभिधाकृतिवयोयावद्विहारा
दिकंसर्वंविष्णुमयंगिरोंगवदजःसर्वस्वरूपोबभौ २० स्वायमात्मात्मगोवत्सानप्रति
वार्यात्मवत्सपैः क्रीडन्नात्मविहारैश्चसर्वात्माप्राविशद्व्रजं २१ तत्तद्वत्सान्पृथङ्
नीत्वातत्तद्गोष्ठेनिवेश्यसः तत्तदात्माभवद्राजंस्तत्तत्सद्मप्रविष्टवान् २२ तन्मातरोवेणु
रवत्वरोत्थिताउत्थाप्यदोर्भिःपरिरभ्यनिर्भरं स्नेहस्नुतस्तन्यपयःसुधासवंमत्वापरंब्रह्म
सुतानपाययन् २३ ततोन्नृपोन्मर्दनमज्जलेपनालंकाररक्षातिलकाशनादिभिः संला
लितःस्वाचरितैःप्रहर्षयन्सायंगतोयामयमेनमाधवः २४ गावस्ततोगोष्ठमुपेत्य कृष्ण
सत्वरंहुंकारघोषैःपरिहूतसंगमान् स्वकान्स्वकान्वत्सतरानपाययन्मुहुर्लिहन्त्यःस्र ३२

वदौधसंपयः २५ गोगोपीनांमातृतास्मिन्सर्वास्नेहर्द्धिकांविना पुरोवदास्वपिहरेस्तोकता
माययाविना २६ व्रजौकसांस्वतोकेषुस्नेहवल्ल्याब्दमन्वहं शनैर्निःसीमववृधेयथाकृष्णे
त्वपूर्ववत् २७ इत्थमात्मात्मनात्मानंवत्सपालमिषेणसः पालयन्वत्सपोवर्षंचिक्रीडेव
नगोष्ठयोः २८ एकदाचारयन्वत्सान्सरामोवनमाविशत् पंचषासुत्रियामासुहायनापू
रणीष्वजः ३० ततोविदूराच्चरतोगावोवत्सानुपव्रजं गोवर्द्धनाद्रिशिरसिचरन्त्योददृशुस्तृणं
३१ दृष्ट्वाऽथतत्स्नेहवशोऽस्मृतात्मासगोव्रजोऽत्यात्मपदुर्गमार्गः द्विपात्ककुद्ग्रीवउदास्य
पुच्छोगाद्धुंकृतैरास्रुपयाजवेन ३२ समेत्यगावोधोवत्सान्वत्सवत्योऽप्यपाययन् गिलन्त्य
इवचांगानिलिहन्त्यःस्वौधसंपयः ३३ गोपास्तद्रोधनायासमौघ्यलज्जोरुमन्युना दुर्गाध्वकृ
च्छ्रतोभ्येत्यगोवत्सैर्ददृशुःसुतान् ३४ तदीक्षणोत्प्रेमरसाप्लुताशयाजातानुरागागतमन्य
वोर्भकान् उदूह्यदोर्भिःपरिरभ्यमूर्ध्निघ्राणैरवापुःपरमांमुदंते ३५ ततःप्रवयसोगोपास्तो

Indira Gandhi National
Centre for the Arts

भा॰द॰ कालेनैषमुनिर्वृत्ताः कृष्णाछनैरूपातात्तदनुस्मृत्युरस्रवः ३६ व्रजस्यरामःप्रेमर्द्धेर्वीक्ष्यौत्कं पूर्वा
३७ ण्ठ्यमनुक्षणं मुक्तस्तनेष्वपत्येष्वप्यहेतुविचिंतयन् ३७ किमेतदद्भुतमिववासुदेवेऽखिला
त्मनि व्रजस्यसात्मनस्तोकेष्वपूर्वंप्रेमवर्द्धते ३८ केयंवाकुतआयातादैवीवानार्युतासुरी
प्रायोमायास्तुमेभर्तुर्नान्यामेपिविमोहिनी ३९ इतिसंचिंत्यदाशार्हो वत्सान्सवयसानपि स
र्वानाचष्टवैकुंठंचक्षुषावयुनेनसः ४० नैतेसुरेशाऋषयोनचैतेत्वमेवभासीशभिदाश्रये
पि सर्वंपृथक्त्वंनिगमात्कथंवदेत्युक्तेनवृत्तंप्रभुणाबलोवेत् ४१ तावदेत्यात्मभूरात्मन्
मानेनत्रुट्यनेहसा पुरोवदाब्दंक्रीडंतंददृशेसकलंहरिः ४२ यावंतोगोकुलेबालाःसव
त्साःसर्वएवहि मायाशयेशयानामेनाद्यापिपुनरुत्थिता ४३ इतएतेत्रकुत्रत्यामन्मा
यामोहितेतरे तावंतएवतत्राब्दंक्रीडंतोविष्णुनासमं ४४ एवमेतेषुभेदेषुचिरंध्यात्वात्म कृष्ण
नात्मभूः सत्याकेकतरेनेतिज्ञातुनेष्टेकथंचनः ४५ एवंसंमोहयन्विष्णुंविमोहंविश्व ३४

मोहनं स्वयैवमाययाजोऽपिस्वयमेवविमोहितः ४६ तम्यांतमोवैन्नैहारंखद्योतार्चिरिवाह
महतीतरमायैश्यंनिहंत्यात्मनियुंजतः ४७ तावत्सर्वेवत्सपालाःपश्यतोजस्यतत्क्षणात्
व्यदृश्यंतघनश्यामापीतकौशेयवाससः ४८ चतुर्भुजाःशंखचक्रगदाराजीवपाणयः किरी
टनःकुंडलिनोहारिणोवनमालिनः ४९ श्रीवत्सांगददोरत्नकंबुकंकणपाणयः नूपुरैः
कटकैर्भाताःकटिसूत्रांगुलीयकैः ५० आंघ्रिमस्तकमापूर्णास्तुलसीनवदामभिः कोमलैः
सर्वगात्रेषुभूरिपुण्यवदर्पितैः ५१ चंद्रिकाविशदस्मेरैःसारुणापांगवीक्षितैः स्वकार्थाना
मिवरजःसत्वाभ्यांस्रष्टृपालकाः ५२ आत्मादिस्तंबपर्यंतैःमूर्तिमद्भिःश्चराचरैः नृत्यगी
ताद्यनेकार्हैःपृथक्पृथगुपासिताः ५३ अणिमाद्यैर्महिमाभिरजाद्याभिर्विभूतिभिः चतुर्वि
शतिभिस्तत्वैःपरीतामहदादिभिः ५४ कालःस्वभावसंस्कारकामकर्मगुणादिभिः स्वमहि
ध्वस्तमहिभिर्मूर्तिमद्भिरुपासिताः ५५ सत्यज्ञानानंतानंदमात्रैकरसमूर्तयः अस्पृष्टभूरिमा

Indira Gandhi National
Centre for the Arts

भा०द० माहात्म्याऽप्युपनिषद्दृशां ५६ एवं सकृद्ददर्शाजः परब्रह्मात्मनोऽखिलान् यस्य भासा स पूर्वो
३५ र्वमिदं विभाति सचराचरं ५७ ततोऽतिकुतुकोद्वृत्य स्तिमितैकादशेंद्रियः तद्धाम्नाभूदज
स्तूष्णीं पूर्देव्यंतीव पुत्रिका ५८ इतीरेशेऽतर्क्ये निजमहिमनि स्वप्रमितिके परत्राजातोऽत
न्निरसनमुखब्रह्मकमितौ अनीशेऽपि द्रष्टुं किमिदमिति वा मुह्यति सति चच्छादाजो ज्ञात्वा स
पदि परमोऽजाजवनिकां ५९ ततोऽर्वाक् प्रतिलब्धाक्षः कः परेतवदुत्थितः कृच्छ्रादुन्मी
ल्य वै दृष्टीराचष्टेदं सहात्मना ६० सपद्येवाभितः पश्यन् दिशोऽपश्यत्पुरःस्थितं वृंदावनं
जनाजीव्यद्रुमाकीर्णं समाप्रियं ६१ यत्र नैसर्गदुर्वैराः सहासन्नृमृगादयः मित्राणीवाजि
तावासद्रुतरुट्तर्षकादिकं ६२ तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयं परमनंत
मगाधबोधं वत्सान् सखीनिव पुरा परितो विचिन्वन्नेकं सपाणिकवलं परमेष्ठिचष्ट कृष्ण
: ६३ दृष्ट्वा त्वरेण निजधोरणतोऽवतीर्य पृथ्व्यां वपुः कनकदंडमिवाभिपात्य स्पृष्ट्वा ३५

चतुर्मुकुटकोटिभिरंघ्रियुग्मं नत्वा मुदश्रुसुजलैरकृताभिषेकं ६४ उत्थायोत्थाय कृष्ण
स्य चिरस्य पादयोः पतन् आस्ते महित्वं प्राग्दृष्टं स्मृत्वा स्मृत्वा पुनः पुनः ६५ शनैरथोत्थाय वि
मृज्य लोचने मुकुंदमुद्वीक्ष्य विनम्रकंधरः कृतांजलिः प्रश्रयवान् समाहितः सवेपथुर्गद्ग
दयैलततेलया ६६ इति श्रीभागवते महापुराणे दशमस्कंधे त्रयोदशोऽध्यायः १३ श्रीब्रह्मो
वाच नौमीड्य तेऽभ्रवपुषे तडिदंबराय गुंजावतंसपरिपिच्छलसन्मुखाय वन्यस्रजे कवलवेत्र
विषाणवेणुलक्ष्मश्रिये मृदुपदे पशुपांगजाय १ अस्यापि देव वपुषो मदनुग्रहस्य स्वेच्छामय
स्य न तु भूतमयस्य कोऽपि नेशे महि त्ववसितुं मनसांतरेण साक्षात्तवैव किमुतात्मसुखानुभूते
२ ज्ञाने प्रयासमुदपास्य नमंत एव जीवंति सन्मुखरितां भवदीयवार्तां स्थाने स्थिताः श्रुतिगतां तनु
वाङ्मनोभिर्ये प्रायशोऽजित जितोऽप्यसि तैस्त्रिलोक्यां ३ श्रेयःस्रुतिं भक्तिमुदस्य ते विभो क्लिश्यंति
ये केवलबोधलब्धये तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनां ४ पुरेह भू

Indira Gandhi National
Centre for the Arts

भा॰द॰ बहवोपियोगिनस्त्वदर्पितेहा निजकर्मलब्धया विबुध्यभक्त्यैवकथोपनीतया प्रपेदिरेञ्जो पूर्वा
३६ ऽच्युततेगतिंपरां ५ तथापिभूमन्महिमाऽगुणस्यतेविबोद्धुमर्हत्यमलान्तरात्मभिः अविक्रि
यात्स्वानुभवादरूपतो ह्यनन्यबोध्यात्मतयानचान्यथा ६ गुणात्मनस्तेपिगुणान्विमातुं
हितावतीर्णस्यकईशिरेस्य कालेनयैर्वाविमिताःसुकल्पैर्भूपांसवःखेमिहिकाद्युभासः
७ तत्तेनुकंपांसुसमीक्षमाणो भुंजानएवात्मकृतंविपाकं हृद्वाग्वपुर्भिर्विदधन्नमस्तेजी
वेतयोमुक्तिपदेसदायभाक् ८ पश्येशमेनार्यमनंतआद्येपरात्मनित्वय्यपिमायिमाय
नि मायांवितत्येक्षितुमात्मवैभवंह्यहंकियानैच्छमिवार्चिरग्नौ ९ अतःक्षमस्वाच्युतमेरजो
भुवोह्यजानतस्त्वत्पृथगीशमानिनः अजावलेपांधतमोंधचक्षुषएषोनुकंप्योमयिना
थवानिति १० क्वाहंतमोमहदहंखचराग्निवार्भूसंवेष्टिताण्डघटसप्तवितस्तिकायः क्वेदृ कृष्ण
ग्विधाविगणिताण्डपराणुचर्यावाताध्वरोमविवरस्यचतेमहित्वं ११ उत्क्षेपणंगर्भगत ३६

स्यपादयोःकिंकल्पतेमातुरधोक्षजागसे किमस्तिनास्तिव्यपदेशभूषितंतवास्तिकुक्षेः
किंयदप्यनंतः १२ जगत्त्रयांतोदधिसंप्लवोदेनारायणस्योदरनाभिनालात् विनिर्गतोऽ
जस्त्वितिवाङ्नवैमृषाकिंत्वीश्वरत्वन्नविनिर्गतोस्मि १३ तच्चेज्जलस्थंतवसज्जगद्वपुः
किंमेनदृष्टंभगवंस्तदैव किंवासुदृष्टंहृदिमेतदैवकिंनोसपद्येवपुनर्व्यदर्शि १५ अत्रैव
मायाधमनावतारेह्यस्यप्रपंचस्यबहिःस्फुटस्य कृत्स्नस्यचांतर्जठरेजनन्यामायात्वमेव
प्रकटीकृतंते १६ यस्यकुक्षाविदंसर्वंसात्मंभातियथातथा तत्त्वय्यपीहतत्सर्वंकिमिदं
माययाविना १७ अद्यैवत्वदृतेऽस्यकिंममनतेमायात्वमादर्शितमेकोसिप्रथमंततोव्र
जसुहृद्वत्साःसमस्ताअपि तावंतोसिचतुर्भुजास्तदखिलैःसाकंमयोपासितास्तावन्त्येवज
गन्त्यभूस्तदमितंब्रह्माद्वयंशिष्यते १८ अजानतांत्वत्पदवीमनात्मन्यात्माऽऽत्मनाभासिवित
त्यमायां सृष्टाविवाहंजगतोविधानइवत्वमेषोंतइवत्रिनेत्रः १९ सुरेष्वृषीष्वीशतथैवनृ

Indira Gandhi National
Centre for the Arts

भा॰द॰ क्षपितिर्येक्षुयारः स्वपितैर्जनस्य जन्मासतांदुर्मदनिग्रहाय प्रभोविधातःसदनुग्रहाय च २० पूर्वा-
३७ कोवेत्तिभूमन्भगवन्परात्मन्योगेश्वरोतीर्भवतस्त्रिलोक्यां क्वाहोकथंवाकतिवाकदेतिवि
स्तारयन्क्रीडसियोगमायां २१ तस्मादिदंजगदशेषमसत्स्वरूपंस्वप्नाभमस्तधिषणंपु
रुदुःखदुःखं त्वय्येवनित्यसुखबोधतनावनंतेमायातउद्यदपियत्सदिवावभाति २२
एकस्त्वमात्मापुरुषःपुराणःसत्यःस्वयंज्योतिरनंतआद्यः नित्योक्षरोऽजस्रसुखोनिरंज
नःपूर्णोद्वयोमुक्तउपाधितोऽमृतः २३ एवंविधंत्वांसकलात्मनामपिस्वात्मानमात्मात्म
तयाविचक्षते गुरुवर्कलब्धोपनिषत्सुचक्षुषायेतेतरंतीवभवानृताम्बुधिं २४ आत्मा
नमेवात्मतयाविजानतांतेनैवजातंनिखिलंप्रपंचितं ज्ञानेनभूयोपिचतत्प्रलीयतेरज्ज्वामहे
र्भोगभवाभवौयथा २५ अज्ञानसंज्ञौभवबंधमोक्षौद्वौनामनान्यौस्तऋतज्ञभावात् अज कृष्ण॰
स्रचित्यात्मनिकेवलेपरेविचार्यमाणेतरणाविवाहनी २६ त्वामात्मनंपरंमत्वापरमात्मानमे ३१

वच आत्मापुनर्बहिर्मृग्यअहोऽज्ञजनताज्ञता २७ अंतर्भवेऽनंतभवंतमेवह्यतत्त्यजंतो
मृगयंतिसंतः असंतमप्यंत्यहिमंतरेणसंतंगुणंतंकिमयंतिसंतः २८ अथापितेदेवप
दांबुजद्वयप्रसादलेशानुगृहीतएवहि जानातितत्त्वंभगवन्महिम्नोनचान्यएकोपिचिरं
विचिन्वन् २९ तदस्तुमेनाथसभूरिभागोभवेऽत्रवान्यत्रतुवातिरश्चां येनाहमेकोपिभवज्ज
नानांभूत्वानिषेवेतवपादपल्लवं ३० अहोतिधन्याव्रजगोरमण्यः स्तन्यामृतंपीतमतीव
तेमुदा यासांविभोवत्सतरात्मजात्मनायत्तृप्तयेऽद्यापिनचालमध्वराः ३१ अहोभाग्यमहो
महोभाग्यंनंदगोपव्रजौकसां यन्मित्रंपरमानंदंपूर्णंब्रह्मसनातनं ३२ एषांतुभाग्यम
हिमाच्युततावदास्तामेकादशैवहिवयंबतभूरिभागाः एतद्धृषीकचषकैरसकृत्पिबामःश
र्वादयोंघ्र्युदजमध्वमृतासवंते ३३ तद्भूरिभाग्यमिहजन्मकिमप्यटव्यांयद्गोकुलेपिकतमां
घ्रिरजोभिषेकं यज्जीवितंतुनिखिलंभगवान्मुकुंदस्त्वद्यापियत्पदरजःश्रुतिमृग्यमेव

Indira Gandhi National
Centre for the Arts

भा॰द॰ ३५ यावद्रागादयःस्तेनास्तावत्कारागृहंगृहं तावन्मोहोङ्घ्रिनिगडोयावत्कृष्णनतेजना ३ पूर्वा
३८ ७ प्रपंचंनिःप्रपंचोपिविडंबयसिभूतले प्रपन्नजनतानंदसंदोहंप्रथितंप्रभो ३८ जानं
तएवजानंतुकिंबहूक्तेनमेप्रभो मनसोवपुषोवाचोवैभवंनवगोचरं ३९ अनुजानीहिमं ।
कृष्णसर्वंत्वंवेत्सिसर्वदृक् त्वमेवजगतांनाथोजगदेतत्तवार्पितं ४० श्रीकृष्णवृष्णिकुल
पुष्करजोषदायिन् क्ष्मानिर्जरद्विजपशूदधिवृद्धिकारिन् उद्धर्मशार्वरहरक्षितिराक्षसध्रु
ग्आकल्पमार्कमर्हन्भगवन्नमस्ते ४१ श्रीशुकउवाच इत्यभिष्टूयभूमानंत्रिःपरि
क्रम्यपादयोः नत्वाभीष्टंजगद्धातास्वधामप्रत्यपद्यतः ४२ ततोनुज्ञाप्यभगवान्स्वभुवं
प्रागवस्थितान् वत्सान्पुलिनमानिन्येयथापूर्वंस्वाकान्स्वकांत ४३ एकस्मिन्नपि।
यातेब्दे प्राणेशंचांतरात्मनः कृष्णमायाहताराजन्क्षणार्धंमेनिरेर्भका ४४ किंकिंन कृष्ण
विस्मरंतीमामायामोहितचेतसः यन्मोहितंजगत्सर्वमभीक्ष्णंविस्मृतात्मकं ४५ कृचु ३८

ध्वमुहृदंकृष्णंस्वागतंतेतिरंहसा नैकोप्यभोजिकवलएहीतःसाधुभुज्यतां ४६ ततो
हसन्हृषीकेशोऽभ्यवहृत्यसहार्भकैः दर्शयंश्चर्माजगरंन्यवर्ततवनाद्व्रजं ४७ बर्हप्र
सूनवनधातुविचित्रितांगःप्रोद्दामवेणुदलशृंगरवोत्सवाढ्यः वत्सान्गृणन्ननुगगीतप
वित्रकीर्तिर्गोपीदृगुत्सवदृशिःप्रविवेशगोष्ठं ४८ अद्यानेनमहाव्यालोयशोदानंदसूनु
ना हतोविताक्यंचास्मादितिबालाव्रजेजगुः ४९ राजोवाच ब्रह्मन्परोद्भवेकृष्णेइयान्प्रे
मकथंभवेत् योभूतपूर्वस्तोकेषुस्वभवेष्वपिकथ्यतां ५० श्रीशुकउवाच सर्वेषामपि
भूतानांनृपस्वात्मैववल्लभः इतरेपत्यवित्ताद्यास्तद्वल्लभतयैवहि ५१ तद्राजेंद्रयथा
स्नेहःस्वस्वकात्मनिदेहिनां नतथाममतालंबिपुत्रवित्तगृहादिषु ५२ देहात्मवादिनां ।
पुंसामपिराजन्यसत्तमः यथादेहःप्रियतमस्तथानह्यनुयेचतं ५३ देहोपिममताभाक्चे
त्तर्ह्यसौनात्मनःप्रियः यज्जीर्यत्यपिदेहेस्मिन्जीविताशाबलीयसी ५४ तस्मात्प्रियतमः

Indira Gandhi National
Centre for the Arts

भा-द- स्वात्मासर्वेषामपिदेहिनां तदर्थमेवसकलंजगदेतच्चराचरं ५५ कृष्णमेनमवेहित्व। पूर्वा
३९ मात्मानमखिलात्मनां जगद्धितायसोप्यत्रदेहीवाभातिमायया ५६ वस्तुतोजानताम
त्रकृष्णंस्थास्नुचरिष्णुच भगवद्रूपमखिलंनान्यद्वस्त्विहकिंचनः ५७ सर्वेषामपिभक्ता
नांभावार्थोभवतिस्थितः तस्यापिभगवान्कृष्णः किमतद्वस्तुरूप्यतां ५८ समाश्रिता
येपदपल्लवप्लवंमहत्पदंपुण्ययशोमुरारेः भवाम्बुधिर्वत्सपदंपरंपदंपदंपदंयद्विपदां
नतेषां ५९ एतत्तेसर्वमाख्यातंयत्पृष्टोहमिहत्वया यत्कौमारेहरिकृतंजगुःपौगंड
केर्भकाः ६० एतत्सुहृद्भिश्चरितंमुरारेरघार्दनंशाद्वलजेमनंच व्यक्तेतरद्रूपमजोर्व
भीष्टवंशृण्वन्गृणन्नेतिनरोखिलार्थान् ६१ एवंविहारैःकौमारैःकौमारंजहतुर्व्रजे नि
लायनैःसेतुबंधैर्मर्कटोत्प्लवनादिभिः ६२ इतिश्रीभागवतेमहापुराणेदशमस्कंधेब्र कृष्ण·
ह्मस्तुतिर्नामचतुर्दशोध्यायः १४ श्रीशुकउवाच ततश्चपौगंडवयःश्रितौव्रजेबभू ३९

वतुस्तौपशुपालसंमतौ गाश्चारयंतौसखिभिःसमंपदैर्वृंदावनंपुण्यमतीवचक्रतुः
१ तन्माधवोवेणुमुदीरयन्वृतोगोपैर्गृणद्भिःस्वयशोबलान्वितः पशून्पुरस्कृत्यपश
व्यमाविशद्विहर्तुकामःकुसुमाकरंवनं २ तन्मंजुघोषालिमृगद्विजाकुलंमहन्मनःप्र
ख्यपयःसरस्वता वातेनजुष्टंशतपत्रगंधिनानिरीक्ष्यरंतुंभगवान्मनोदधे ३ सतत्रत
त्रारुणपल्लवश्रियाफलप्रसूनोरुभरेणपादयोः स्पृशच्छिखान्वीक्ष्यवनस्पतीन्मुदा
स्मयन्निवाहाग्रजमादिपूरुषं ४ श्रीभगवानुवाच अहोअमीदेववरामरार्चितंपादांबु
जंतेसुमनःफलार्हणं नमंत्युपादायशिखाभिरात्मनःस्तमोपहत्यैतरुजन्मयत्कृतं ५
एतेलिनस्तवयशोखिललोकतीर्थंगायंतआदिपुरुषानुपथंभजंते प्रायोअमीमुनिगणा
भवदीयमुख्यागूढंवनेपिनजहत्यनघात्मदैवं ६ नृत्यंत्यमीशिखिनईड्यमुदाहरिण्यः
कुर्वंतिगोप्यइवतेप्रियमीक्षणेन सूक्तैश्चकोकिलगणागृहमागतायधन्यावनौक

Indira Gandhi National
Centre for the Arts

भा-द- सद्यानुहिंसतांनिसर्गः ७ धन्येयमद्यधरणीतृणवीरुधस्त्वत्पादस्पृशोद्रुमलताः कर पूर्वी·
४० जाभिमृष्टाः नद्योद्रयःखगमृगाःसदयावलोकैर्गोप्यांतरेणभुजयोरपियत्स्पृहाश्रीः ८
श्रीशुकउवाच एवंवृंदावनंश्रीमत्कृष्णःप्रीतमनापशून् रेमेसंचारयन्नद्रेःसरिद्रोधःसुसानु
गः ९ क्वचिद्गायतिगायत्सुमदांधालिष्वनुव्रतैः उपगीयमानचरितःपथीसंकर्षणान्वितः
१० क्वचिच्चकलहंसानामनुकूजतिकूजितं अभिनृत्यतिनृत्यंतंबर्हिणंहासयन्क्वचित् ११
मेघगंभीरयावाचानामभिर्दूरगान्पशून् क्वचिदाह्वयतिप्रीत्यागोगोपालमनोज्ञया
१२ चकोरक्रौंचचक्राह्वभारद्वाजांश्चबर्हिणः अनुरौतिस्मसत्वानांभीतवद्व्याघ्रसिंहयो
: १३ क्वचित्क्रीडापरिश्रांतंगोपोत्संगोपबर्हणं स्वयंविश्रमयत्यार्यंपादसंवाहनादि
भिः १४ नृत्यतोगायतःक्वापिवल्गतोयुध्यतोमिथः गृहीतहस्तौगोपालान्हसंतौप्रश कृष्ण-
शंसतुः १५ क्वचित्पल्लवतल्पेषुनियुद्धश्रमकर्षितः वृक्षमूलाश्रयःशेतेगोपोत्संगोपबर्ह ४०

णः १६ पादसंवाहनंचक्रुःकेचित्तस्यमहात्मनः अपरेहतपाप्मानोव्यजनैःसमवीजयन् १
७ अन्येतदनुरूपाणिमनोज्ञानिमहात्मनः गायंतिस्ममहाराजस्नेहक्लिन्नधियःशनैः १८
एवंनिगूढात्मगतिःस्वमाययागोपात्मजत्वंचरितैर्विडंबयन् रेमेरमालालितपादपल्लवोग्रा
म्यैःसमंग्राम्यवदीशचेष्टितः १९ श्रीदामानामगोपालोरामकेशवयोःसखा सुबलस्तोक
कृष्णाद्यागोपाःप्रेम्णेदमब्रुवन् २० गोपाऊचुः राममहाबाहोकृष्णदुष्टनिबर्हण इतो
विदूरेसुमहद्वनंतालालिसंकुलं २१ फलानितत्रभूरीणिपतंतिपतितानिच संतिकिंत्वव
रुद्धानिधेनुकेनदुरात्मना २२ सोतिवीर्योसुरोरामहेकृष्णखररूपधृक् आत्मतुल्यबलैर
न्यैर्ज्ञातिभिर्बहुभिर्वृतः २३ तस्मात्कृतनराहाराद्भीतैर्नृभिरमित्रहन् नसेव्यतेपशु
गणैःपक्षिसंघैर्विवर्जितं २४ विद्यंतेऽभुक्तपूर्वाणिफलानिसुरभीणिच एषवैसुरभि
र्गंधोविषूचीनोवगृह्यते २५ प्रयच्छतानिनःकृष्णगंधलोभितचेतसां वांछास्तीमहती

Indira Gandhi National
Centre for the Arts

भा·द रामगम्यतां यदि रोचते २६ एवं सुहृद्वचः श्रुत्वा सुहृत्प्रियचिकीर्षया प्रहस्य जग्मतुर्गोपैर्वृतौ ता- पूर्वा·
४१ लवनं प्रभूः २७ बलः प्रविश्य बाहुभ्यां तालान्संपरिकंपयन् फलानि पातयामास मतंगज-
इवौजसा २८ फलानां पततां शब्दं निशम्यासुररासभः अभ्यधावत्क्षितितलं सनगं परिकंपय-
न् २९ समेत्य तरसा प्रत्यक् द्वाभ्यां पद्भ्यां बलं बली निहत्योरसि काशब्दं मुंचन्पर्यसरत्खलः ३०
पुनरासाद्य संरब्ध उपक्रोष्टा पराक्स्थितः चरणावपरौ राजन्बलाय प्राक्षिपद्रुषा ३१
स तं गृहीत्वा प्रपदोर्भ्रामयित्वैकपाणिना चिक्षेप तृणराजाग्रे भ्रामणत्यक्तजीवितं ३२
तेनाहतो महातालो वेपमानो महच्छिराः पार्श्वस्थं कंपयन्भग्नः स चान्यं सोपि चापरं ३३ ब-
लस्य लीलयोत्सृष्टखरदेहहताहताः तालाश्चकंपिरे सर्वे महावातेरिता इव ३४ नै-
तच्चित्रं भगवति ह्यनंते जगदीश्वरे ओतप्रोतमिदं यस्मिंस्तंतुष्वंग यथा पटः ३५ ततः कृष्णं च कृस
रामं च ज्ञातयो धेनुकस्य ये क्रोष्टारोभ्यद्रवन्सर्वे संरब्धा हतबांधवाः ३६ तांस्तानापततः कृष्णो ४१

रामश्च नृपलीलया गृहीतपश्चाच्चरणान्प्राहिणोत्तृणराजसु ३७ फलप्रकरसंकीर्णं दैत्यदे-
हैर्गतासुभिः रराज भूः सतालाग्रैर्घनैरिव नभस्तलं ३८ तयोस्तत्सुमहत्कर्म निशम्य विबुधा-
दयः मुमुचुः पुष्पवर्षाणि चक्रुर्वाद्यानि तुष्टुवुः ३९ अथ तालफलान्यादन्मनुष्या गतसाध्व-
साः तृणं च पशवश्चेरुर्हतधेनुककानने ४० कृष्णः कमलपत्राक्षः पुण्यश्रवणकीर्तनः
स्तूयमानोनुगैर्गोपैः साग्रजो व्रजमागमत् ४१ तं गोरजश्छुरितकुंतलबद्धबर्हवन्यप्रसूनरु-
चिरेक्षणचारुहासं वेणुं क्वणंतमनुगैरनुगीतकीर्तिं गोप्यो दिदृक्षितदृशोभ्यगमन्समेता
४२ पीत्वा मुकुंदमुखसारघमक्षिभृंगैस्तापं जहुर्विरहजं व्रजयोषितोह्नि तत्सत्कृतिं सम-
धिगम्य विवेश गोष्ठं सव्रीडहासविनयं यदपांगमोक्षं ४३ तयोर्यशोदारोहिण्यौ पुत्रयोः पु-
त्रवत्सले यथाकामं यथाकालं विधत्तां परमाशिषः ४४ गताध्वानश्रमौ तत्र मज्जनोन्मर्दना-
दिभिः नीवीं वसित्वा रुचिरां दिव्यस्रग्गंधमंडितौ ४५ जनन्युपहृतं प्राश्य स्वाद्वन्नमुपलं

Indira Gandhi National
Centre for the Arts

भा०द लितो संविश्य चरज्ञाय्यायां सुखं सुषुपतुर्व्रजे ४६ एवं स भगवान्कृष्णो वृंदावनचरः क्व पूर्वो
४२ चित् ययौ रामम्रते राजन् कालिंदीं सखिभिर्वृतः ४७ अथ गावश्च गोपाश्च निदाघातपपी
डिता दुष्टं जलं पपुस्तस्यास्तृषार्त्ता विषदूषितं ४८ विषांभस्तदुपस्पृश्य दैवोपहतचेतसः
निपेतुर्व्यसवः सर्वे सलिलांते कुरूद्वहः ४९ वीक्ष्य तान्वै तथाभूतान्कृष्णो योगेश्वरेश्वरः ई
क्षयामृतवर्षिण्या स्वनाथान्समजीवयत् ५० ते संप्रतीतस्मृतयः समुत्थाय जलांतिकात्
आसन्सुविस्मिताः सर्वे वीक्षमाणाः परस्परं ५१ अन्वमंसत तद्राजन्गोविंदानुग्रहेक्षितम्
पीत्वा विषं परेतस्य पुनरुत्थानमात्मनः ५२ इति श्रीभागवते महापुराणे दशमस्कंधे धेनुक
वधो नाम पंचदशोध्यायः १५ श्रीशुक उवाच